M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. ____
Ser. 872

Title: Tajika
(Book on Astrology)

872

872

ताजिक (ज्योतिष ग्रंथः)

Tājika (Book on Astrology)	Title
Nilakantha	Author
	Editor
	Year, Vols.
	Publisher
872	Remarks

श्रीगणेशाय नमः ॥ चंडीकर्ण लभाकलव्यकुतुकांदडामशंकडाग्रगंरुत्वाताडवडंबरेपशुपतेः खेलद्वलभ्रंख
लौ ॥ चंडांशोरिवमंडलंलदपरंसंदर्शयंतंबरेहेरंबोजगदंबिकाविहसयन्त्व्यःश्रेयसेगर्जतां ॥ १ ॥ दिवाकरोनामबभूव
वाविद्वान्दिकवाकराभोगणितेषुमन्ये ॥ स्वकल्पितैर्येननिबंधवृंदैर्बलंजगद्दर्शितविश्वरूपं ॥ २ ॥ तस्यात्मजाः
पंचसमाबभूवुः पंचांगकल्पागणितागमेषु ॥ पंचाननावादिगजेंद्रभेदेपंचाग्निकल्पाद्विजकर्मणाच ॥ ३ ॥
अजनिष्टकृष्णनामाज्येष्ठस्तेषांकनिष्ठ विधानवद्यप्राचांप्राचांवेत्ताजगत्ख्यातः ॥ ४ ॥ तस्माज्जातः
कनिष्ठोविविधबुधगुणश्रेष्ठतांप्राप्यजाग्रज्ज्योतिःशास्त्रेनेशभ्वत्प्रकटितविभवायस्यशिष्याःप्रशिष्याः ॥
विष्णुर्ज्योतिर्विदिव पतिर्विदितगुणोहमिदंवरकरींद्रोग्रंथव्याख्यानखर्वीकृतविविधगुरुर्गर्वहाग
र्वभाजां ॥ ५ ॥ आसीदासिंपुरासीकृतगणकगणग्रामणीर्गर्वभेत्तावेत्ताग्रंथांतराणामति गुरुनुजस्त
स्यकस्याप्यजेयः ॥ मल्लारिर्वादिवृंदप्रशमनविधयेकोपिमल्लारिनामाव्यक्ताव्यक्तप्रवक्ताजगतिविपदृयः स
र्वसिद्धांतवेत्ता ॥ ६ ॥ तस्यानुजः केशवनामधेयोज्योतिर्विदानंदसमुद्रचंद्रः ॥ वाणीप्रवीणावचनामृतेनसंजी
वयामासकलाविलासी ॥ ७ ॥ तस्यानुज केप्रतिविश्वनाथोविष्णुप्रसादाद्गुणमात्रजिष्णुः ॥ ससर्वदेवज्ञविला
सविद्गोमल्लारितःसाधितसर्वविद्यः ॥ ८ ॥ आसीद्देदांतवेदास्मृतिनिगमपदुर्ग्रामणीगर्वभेत्ताकर्ताग्रंथांतरा
णांफणिपतिनिगमस्यापिवेत्ताधिकाशी ॥ वक्ताश्रीनीलकंठात्मजभजनपटुर्नीलकंठःसचक्रेसंज्ञातंत्रंद्रुहं

सकलशुभदशादुर्दशादर्शभूतं ॥ ९ ॥ गोदारस्थगोलाभिधपुरवसतिःप्रार्थदीकमूर्षांसंज्ञातंत्रस्थटीकांव्यद
धदभिनवांगद्यपद्यानवद्यां ॥ १० ॥ शम्बहिश्वोपकृत्येविशदतरतयादेवविद्विश्वनाथोग्रंथेमोक्ताग्रहगणितवि
दामग्रगण्योप्यवर्गः ॥ १० ॥ निर्विघ्नेनग्रंथसमाप्त्यर्थंमंगलमाचरन्चिकीर्षितंप्रतिजानीते ॥ प्रणम्येति ॥
श्रीनीलकंठःतत्ताजिकंतत्पूर्वाचार्योक्तंताजिकंसूक्तिभिःविविनक्तिसुयुक्तिभिःनानाछंदोभिर्वाविविनक्ति
प्रकटीकरोति· कथंभूतंसूरिमनःप्रसादकृत्सूरयःपंडिताःतेषांमनःअंतःकरणंतस्यप्रसादकृत्·एतत्तत्रं

प्रणम्यहेरंबमथोदिवाकरंगुरोरनंतस्यतथापदांबुजं ॥ श्रीनीलकंठोविविनक्तिसूक्तिभिःतत्ताजि
सूरिमनःप्रसादकृत् ॥ १ ॥ पुमांश्चरोग्निःसुदृढश्चतुष्पाद्क्रोधपित्तातिरवोतिरुग्रः ॥ पीतोदि राद्ः
नंप्राग्विषमोल्पसंगप्रजोतिरूक्षःनृपःसमाजः ॥ २ ॥

भावलोकनेनपंडितमनःप्रसन्नंभवतीत्यर्थः किंकृत्वा·हेरंबंगणपतिंप्रणम्य·पुनःकिंकृत्वा·दिवाकरंसूर्यं
स्व प्रणम्य·पुनःकिंकृत्वा·अनंतदैवज्ञाख्यगुरोःपादांबुजंप्रणम्य·११ अथद्वादशराशिस्वरूपमाह·तत्रादौमेषमस्ये
ति·पुमानिति·पुमान्पुरुषराशीचरश्चरसंज्ञकः अग्निःअग्निराशिःसुदृढःचतुःपाच्चतुश्चरणःरक्तःआरक्त
वर्णःउग्रस्वभावःपित्तःपित्तस्वभावःअतिरवोमहाशब्दःअद्रिःपर्वतचारी·उग्रःक्रूरःपीतःपीतवर्णःदि
नंदिवाबलीप्राकपूर्वदिक्स्वामीविषमोदयःअल्पसंगप्रजःअल्पस्त्रीसंगील्पप्रजश्चरूक्षःरूक्षःकांतिर

नी॰ उ॰ दृप्तः नृपः क्षत्रियवर्णः दिनं समांगः अजः मेषः एवंगुणविशिष्टोज्ञेयः अयंराशिर्द्विवर्णः आरक्तवर्णः
पीतवर्णश्च मेषसिंहधन्विनामेववर्णद्वयमुक्तं कुतः समरसिंहेनोक्तत्वात् ॥२॥ वृषराशिस्वरूपमाह वृ
षइति स्थिरः सुष्टुभूमिचारी वायुयुताचप्रकृतिः स्थिरसंज्ञकः स्त्रीराशिसंज्ञकः क्षितिभूमिराशिः
शीतलः स्वभावः रूक्षः कांतिरहितः याम्येट् दक्षिणदिक्स्वामी सुभूः सुष्टुभूमिचारी वायुः वातप्रकृ
॥२॥ तिः निशारात्रिबली चतुष्पाद् चतुश्चरणः श्वेतः शुभ्रवर्णः अतिशब्दो महान्शब्दः अविषमोदयः म

वृषस्थिरस्त्रीक्षितिशीतरूक्षो याम्येट् सुभूवायुनिशाचतुष्पात् ॥ श्वेतोतिशब्दो विषमोदय
श्च मध्यप्रजासंगशुभोपि वैश्यः ॥३॥ प्रत्यक्समीरः शुकभाद्विपान्ना द्वंद्वं द्विमूर्तिर्विषमो
दयोघ्नः ॥ मध्यप्रजासंगवनस्थभूर्द्रा दीर्घस्वनः स्निग्धदिनेट्तथोग्रः ॥४॥

ध्यप्रजासंगमः मध्यप्रजः मध्यमस्त्रीसंगमश्च शुभः सौम्यः वैश्यः वैश्यवर्णः अयंश्लथांगः मेषसिं
हधन्विनामेवदृढांगत्वमुक्तं अर्थादितरे श्लथांगा बोध्याः ॥३॥ अथमिथुनराशिस्वरूपमाह प्रत्य ॥२॥
गिति द्वंद्वं मिथुनराशिरेतादृशस्वरूपो ज्ञेयः तथा प्रत्यक्पश्चिमदिक्स्वामी समीरो वायुराशिः शु
कभाः शुककांतिः हरिद्वर्ण इत्यर्थः द्विपाद् द्विचरणः नापुरुषराशिः द्विमूर्तिः द्विभावः चरस्थिरद्विः स्वभा
वात्मक इत्यर्थः तत्रापि पूर्वार्धं स्थिरं उत्तरार्धं चरमिति विशेषो ज्ञेयः उक्तंच भट्टोत्पलेन चरराशेर्विपरी

तमिश्रं वाच्यं द्विमूर्त्युदये स्थिरवत्स्वभावस्वनो महाशब्दः स्निग्धः चिक्कणः दिनेट् दिवाबली तथाशब्दः पादपू
रणे उग्रः क्रूरः अयंश्लथांगः ॥४॥ अथकर्कराशिस्वरूपमाह वक्रप्रजासंगपदइति कर्कराशिरेतादृशोज्ञे
यः यथा वक्रप्रजासंगपदः वक्रप्रजो वक्रस्त्रीसंगो वक्रचरणः चरश्चरसंज्ञकः अंगनास्त्रीराशिः पाटलः श्वे
तरक्तवर्णः हीनशब्दो निःशब्दः शुभः सौम्यः कफी कफप्रकृतिः स्निग्धः चिक्कणः जलं जलराशिः अबुचारीज
लचरः समोदयी विप्रो ब्राह्मणवर्णः निशारात्रिबली उत्तरेशः उत्तरादिक्स्वामी अयंश्लथांगः ॥५॥ अथसिं

वक्रप्रजासंगपदः कुलीरश्चरांगनापाटलहीनशब्दः ॥ शुभः कफी स्निग्धजलांबुचारी समोद
यीविप्रनिशोत्तरेशः ॥५॥ पुमान्स्थिरोग्निर्दिनपित्तरूक्षपीतोग्रपूर्वेशदृढश्चतुष्पाद् ॥ समो
दयो दीर्घरवोल्पसंगः प्रजोहरिः शैलनृपोग्रधूम्रः ॥६॥

हराशिस्वरूपमाह पुमानिति हरिः सिंहः एतादृशः पुमान् पुरुषराशिः स्थिरः स्थिरसंज्ञकः अग्निराशिः
दिनं दिवाबली पीतः पीतवर्णः रूक्षः कांतिरहितः पित्तः पित्तप्रकृतिः पूर्वेशः पूर्वदिक्स्वामी दृढः दृढांगः च
तुष्पात् चतुश्चरणः समोदयः दीर्घरवो महाशब्दः अल्पसंगप्रजः अल्पस्त्रीसंगः अल्पप्रजश्च शैलः पर्वत
चारी नृपः क्षत्रियवर्णः उग्रः क्रूरः धूम्रः धूम्रवर्णः अयंराशिर्द्विवर्णः पीतोधूम्रश्च ॥६॥ अथकन्याराशि
स्वरूपमाह पांडुरिति कन्यास्वरूपमेतादृशं पांडुः पिंगलवर्णा द्विपात् द्विचरणा स्त्रीस्त्रीराशिः द्वितनुः
द्विस्वभावा चरस्थिरस्वभावात्मिका यमाशा दक्षिणदिक्स्वामी निशारात्रिबली मरुत्वायुप्रकृतिः ॥

नी॰ ३० शीताशीतलस्वभावा समोदयाक्ष्माभूमिराशिः अर्धशब्दा खंडितशब्दा शुभभूमिः शुभभूमिचारिणी वैश्यवर्णा रूक्षा कांतिरहिता अल्पसंगप्रसवा अल्पपुंसंगमाः अल्पप्रसवा च शुभा सौम्यराशिः चकारः समुच्चयार्थः
अयं श्लोकार्थः ॥ ७ ॥ अथ तुलाराशिस्वरूपमाह पुमानिति पुमान् पुरुषराशिः चरश्चरसंज्ञकः चित्रो नाना
॥३॥ विधवर्णः समोदयः उष्णः प्रसक्तः पश्चिमस्त्रीसंगश्च शूद्रः शूद्रवर्णः उग्रः धुवीर्यो दिवाबली द्विपदः द्विचरणः
समानः समांगः अयं श्लोकार्थः ॥ ८ ॥ अथ वृश्चिकराशिस्वरूपमाह स्थिरः सित इति स्थिरः स्थिरसंज्ञकः
सितः शुभ्रवर्णः स्त्रीस्त्रीराशिः जलं जलराशिः उत्तराशा उत्तरदिक्स्वामी निशारात्रिबली स्वोनोनिः शब्दः
पांडुर्द्विपात्स्त्री द्वितनुर्यमाशा निशामरुच्छीतसमोदयक्ष्मा ॥ कन्यार्धशब्दाशुभभूमिवैश्यरूक्षा
ल्पसंगप्रसवा शुभा च ॥ ७ ॥ पुमांश्चरश्चित्रसमोदयोष्णः प्रत्यङ् मरुत्स्निग्धरवो नवन्यः ॥ स्वल्पप्र
जासंगमशूद्र उग्रः स्तुलो धुवीर्यो द्विपदः समानः ॥ ८ ॥ स्थिरः सितः स्त्री जलमुत्तराशानिशार
वो नो वक्रपातकफा च ॥ समोदयो वारिचरोतिसंगप्रजाः शुभस्निग्धतनुर्द्विजोलिः ॥ ९ ॥ ॥३॥
वक्रपात वक्रचरणः कफा कफप्रकृतिः समोदयः वारिचरो जलचरः अतिसमप्रजः वक्रस्त्रीसंभोगवक्रप्रज
श्च शुभः सौम्यः स्निग्धतनुः चिक्कणतनुः द्विजः ब्राह्मणवर्णः अलिः वृश्चिकराशिरेतादृशो ज्ञेयः अयं श्लोकार्थः
॥ ९ ॥ अथ धनुःस्वरूपमाह नास्वर्णभा इति नापुरुषराशिः स्वर्णभाः स्वर्णकांतिः शैलः पर्वतचारी समोद
यः अतिशब्दो महच्छब्दः दिनं दिवाबली प्राक् पूर्वदिक्स्वामी दृढः दृढांगः रूक्षः कांतिरहितः हरितः पीतवर्णः
राजोक्षत्रियवर्णः उष्णः पित्तः पित्तप्रकृतिः अल्पसूतिसंगः अल्पप्रजः अल्पस्त्रीसंगश्च द्विमूर्तिश्चरस्थिर

स्वभावात्मकः द्विपदः द्विचरणः तत्रापि पूर्वार्धे द्विपदत्वं उत्तरार्धे चतुष्पदत्वं उत्तरार्धे चतुष्पदत्वं स्वयमेव अग्रे
वक्ष्यति अग्निः अग्निराशिः उग्रः क्रूरः अयं राशीदृक्वर्णः स्वर्णवर्णः पीतवर्णश्च ॥ १० ॥ अथ मकरराशि
स्वरूपमाह मृगश्चर इति मृगो मकरराशिः एतादृशो ज्ञेयः चरश्चरसंज्ञकः क्ष्माभूमिराशिः अर्धरवोऽर्धशब्दः
यमाशा दक्षिणदिक्स्वामी स्त्रीस्त्रीराशिः पिंगलवर्णः रूक्षः कांतिरहितः शुभः सौम्यः भूमिः भूमिचारी शीतः शी
तलस्वभावः स्वल्पप्रजासंगः स्वल्पप्रजः स्वल्पस्त्रीसंगश्च समीरो वातप्रकृतिः रात्रिः रात्रिबली आद्ये चतुःपाद्
राशिपूर्वार्धे चतुःपदत्वं उत्तरार्धे जलचरत्वं ज्ञेयं उत्तरार्धे जलचरत्वं अग्रे वक्ष्यति विषमोदयः विट् वैश्यवर्णः अं
नाः स्वर्णभाः शैलसमोदयोतिशब्दो दिनं प्राग्दृढरूक्षपीतः ॥ राजोष्णपित्तो धनुरल्पसूतिसंगो द्विमूर्तिर्द्विप
दोग्निरुग्रः ॥ १० ॥ मृगश्चरः क्ष्मार्धरवो यमाशा स्त्री पिंगरूक्षः शुभभूमिशीतः ॥ स्वल्पप्रजासंगसमी
ररात्रिराद्ये चतुष्पाद्विषमोदयो विट् ॥ ११ ॥ कुंभोपदो नादिनमध्यसंगप्रसूः स्थिरः कर्बुरवन्यवायुः प्रत्नि
ग्धोष्णखंडः स्वरतुल्यधातुः शूद्रः प्रतीचीविषमोदयोग्रः ॥ १२ ॥
अयं श्लोकार्थः ॥ ११ ॥ अथ कुंभराशिस्वरूपमाह कुंभोपदो नेति अपदश्चरणरहितः नापुरुषराशिः दिनं दिवाब
ली मध्यसंगप्रसूः मध्यस्त्रीसंगमो मध्यप्रसवश्च स्थिरः स्थिरराशिः कर्बुरश्चित्रवर्णः वन्यः वनचारी श्वा पुराशिः
स्निग्धः चिक्कणः उष्णः खंडस्वरः अर्धस्वरः तुल्यधातुः समवातपित्तकफप्रकृतिः शूद्रः शूद्रवर्णः प्रतीची पश्चि
मदिक्स्वामी विषमोदयः उग्रः क्रूरः अयं श्लोकार्थः ॥ १२ ॥ अथ मीनराशिस्वरूपमाह मीन इति मीनराशिरेता
दृशो ज्ञेयः अपदश्चरणरहितः स्त्रीस्त्रीराशिः कफः कफप्रकृतिः वारिजं जलराशिः रात्रिः रात्रिबली निःश

नी॰ उ॰ द्वः शब्दरहितः बभ्रुः पिंगलवर्णः ह्रितनुः चरस्थिरद्विः स्वभावात्मकः जलस्थः जलचरराशिः स्निग्धः चिक्कणः
अतिसंगप्रसवः अत्यंतस्त्रीसंगोत्यंतप्रसवश्च अपिशब्दः समुच्चये विप्रः ब्राह्मणवर्णः शुभः सौम्यः उत्तराशेट्
उत्तरदिक्स्वामी विषमोदयः अयं श्लोकार्थः ॥ १३ ॥ एवं राशिस्वरूपमुक्त्वेदानीं राशीनां मित्रामित्रविभागमाह॰
॥४॥ धरांबुनोरिति पृथ्वीराशिजलराश्योर्वर्गेषु सुहृत्वं एवं अग्निसमीरयोः अग्निराशिवायुराशि वर्गे मित्रत्वे
परतः एतद्वैपरीत्ये अरिभावः शत्रुभावः एतदुक्तं भवति पितापुत्रयोः स्त्रीपुरुषयोर्वा स्वामिसेवकयोर्वा अन्ययोर्वा
यस्यकस्यापि मैत्रीविचारे पृथ्वीराशिजलराशिसंबंधे मित्रत्वं वक्तव्यं॰ एवं अग्निराशिवायुराशिसंबंधे मित्रत्वं
मीनोपरस्त्रीकफवान्निशाबली निःशब्दबभ्रुर्द्वितनुर्जलस्थः ॥ स्निग्धोतिसंगप्रसवोपि विप्रः शुभोत्तरा
शेट्विषमोदयश्च ॥ १३ ॥ धरांबुनोरग्निसमीरयोश्च वर्गेषु सुहृत्वं परतोरिभावः ॥ चापांत्यभागस्य च
तुष्परत्वं ज्ञेयं मृगांत्यस्य जले चरत्वं ॥ १४ ॥ पित्तानिलौ धातुसमः कफश्च त्रिर्मेषतः स्युरिभिरुहनी
याः ॥ राजन्यविट्शूद्रधरासुराश्च सर्वं फलं राश्यनुसारतः स्यात् ॥ १५ ॥
वक्तव्यं अन्यथा शत्रुत्वं यथा भूम्यग्न्योः भूम्यनिलयोः अंबुअग्न्योः अंबुवाय्वोर्वर्गे शत्रुत्वं यच्च द्वयोरेकएव ॥४॥
पृथिव्यादिवर्गः स्यात्तद्द्वयोः परस्परमतिप्रीतिरित्यर्थः ततः सिद्धं अथ राशिस्वरूपकथनावसरे धनुर्मकरयो
रत्नेकं किंचित्स्वरूपविशेषं सिंहावलोकन्यायेनाह॰ चापेति॰ ५ चापस्य धनुषः अंत्यभागे उत्तरार्धे चतुःपदत्वं
ज्ञेयं मृगस्य मकरस्य अंत्यभागे उत्तरार्धे जलचरत्वं ज्ञेयं अथ उक्तराशिस्वरूपस्य फलकथनार्थं संक्षेपेण १५
किंचित्स्वरूपमनुष्टुभाह॰ पित्तेति॰ मेषः पित्तवान् वृषोऽनिलो वायुः मिथुनो धातुसमः वातपित्तकफात्मकः

कर्कः कफी तथा सिंहः पित्तं कन्यानिलः तुला धातुसमः वृश्चिकः कफी एवं धनुः पित्तं मकरोनिलः कुंभो धातुस
मः मीनः कफी इति एवमेव मेषराशिमारभ्य मीनपर्यंतं चतुः चतुः फलत्वात् त्रिस्त्रिरावृत्तं भवति एते राशयः स्युरिभिः
पंडितैः ऊहनीयाः ज्ञातव्याः अथ राजन्यविट्शूद्रधरासुराणां द्वादशराशिषु त्रिरावृत्तिर्ज्ञातव्या॰ तद्यथा॰ मेषः रा
जन्यः क्षत्रियवर्णः वृषः विट् वैश्यवर्णः मिथुनः शूद्रवर्णः कर्कः धरासुरो ब्राह्मणवर्णः तथा सिंहः क्षत्रियवर्णः क
न्या वैश्यवर्णः वृश्चिको ब्राह्मणवर्णः एवं धनुः क्षत्रियवर्णः मकरो वैश्यवर्णः कुंभः शूद्रवर्णः मीनो ब्राह्मणवर्णः एते
षां सर्वफलं राश्यनुसारतः राशिस्वरूपसदृशं फलं स्यादित्यर्थः ॥ ॥ अथ गणितं वक्ष्यति॰ तत्रादौ ग्रहाणां चालनं
वक्ष्यति॰ तत्र चालने वर्षप्रवृत्तिरपेक्षिता सा च ग्रंथकृता अत्र नोक्ता कुतः वर्षतंत्रे उक्तत्वात्॰ सा तु अस्माभिः अत्रोपयु
क्तत्वात् प्रदर्श्यते॰ अन्यच्च वर्षेशनिर्णयः दशा अंतर्दशा मासप्रवेशा दिनप्रवेशादिकं अत्रोपयुक्तं तु वर्षतंत्रे प्रदर्शित
मिति नात्र दर्शितं॰ अत्र तु अस्माभिः यस्य यत्रोपयोगस्तावन्मात्रं प्रदर्श्यते॰ अथ वर्षफलसाधनार्थं वर्षप्रवृत्तिसम
यमाह॰ गताः समाः पादयुताः प्रकृति २१ घ्नसमागणात् ॥ खवेदा ४० प्तघटीयुक्ता जन्मवारादिसंयुता ॥ अ
ब्दप्रवेशो वारादिः सप्ततष्टेत्र निर्दिशेत् ॥ गताः समाः गतवर्षाणि तद्यथा॰ जन्मकालिकः शकौ वर्तमानशाका
च्छोध्यः शेषं गतसमाः ताः पादयुताः स्वचतुर्थांशेन युताः कार्याः प्रकृतिरेकविंशतिः तद्घ्नः तेन गुणितो यः स
मागणो वर्षगणः तस्मात् खवेदा ४० घटीयुक्ताः चत्वारिंशता भक्ता लब्धा घट्यादिफलं तु अब्धं तेन चतुर्थांशयुक्तसमा युताः
कार्याः तत्र जन्मवारादिः जन्मकालिकवारइष्टघटीपलैः संयुताः कार्याः तदनंतरं ऊर्ध्वांके सप्ततष्टे सप्तभिर्भ
क्ते यत् अत्रास्मिन् ग्रंथे अब्दप्रवेशो वर्षप्रवेशो वारादिः वारघटीपलात्मकं निर्दिशेत् वदेत्॰ अत्र वर्तमानो वारो ज्ञेयः

नी· ३ अथतिथिसाधनमाह· शिवघ्नो ११९: खखवाब्धींदुलवाढ्यः खाग्निशेषितः॥ जन्मतिथ्यन्वितस्तत्रतिथावब्द
प्रवेशनं॥ अब्दः गतवर्षगणः शिवघ्नः एकादशभिर्गण्यः खखवाब्धींदुलवाढ्यः शशस्याधिकशतभागः १७०
तेनअब्दः युक्तः कार्यः जन्मतिथ्यन्वितः शुक्लप्रतिपदारभ्यजन्मकालीनवर्तमानातिथिभिरन्वितः युक्तः कार्यः
॥५॥ खाग्निशेषितः त्रिंशताभक्तः तत्रागततिथौ तस्मिन्शेषतिथौ अब्दप्रवेशनं अब्दप्रवेशोभवति· अस्यांतिथौवर्षप्रवे
शोभवतीतिनियमोनास्ति कदाचित् पूर्वतिथौ अग्रिमतिथौ चभवति· अत्रवारस्यैवप्रामाण्यात्· तिथित्रयस्य
मध्येयस्मिन्तिथौपूर्वानीतवासरोभवतिसेववर्षप्रवेशोतिथिर्ज्ञातव्या· यत्रकुत्रापिविशेषतः नष्टः एवशब्दः
समायातितत्रलब्धस्यत्यागः शेषस्यग्रहणमितिसर्वज्ञेर्ज्ञेयं·॥ अथउदाहरणक्रमोलिख्यते· तत्रादौकस्यचि
जन्मसमयोलिख्यते· संवत् १६।४८। शाके १५।१३ माघशुक्लबुधेघटि ३६ श्रवण ५४ वज्रयोग ६ अस्मि
न्शुभदिनेसूर्योदयात्गतघटीषु ७ पलेषु ५३ तथारात्रिघटीषु १२ पलेषु ३१ जन्मभादेशांतरयोजनानिध
नानि ३०॥ सूर्यः ९।३०।६। जन्मलग्नं·५।१०।५३।५० अथवर्षप्रवेशस्यउदाहरणं· तत्रजन्मकालीनशकः·
१५।१३। वर्तमानशकसकाशात् १५।५०। शोधितेशेषांकप्रमितोगतवर्षगणः ३७ अयंस्वचतुर्थांशेन ९।१५ ॥५॥
युक्तः ४६।१५।०। वर्षगणः ३७ एकविंशतिभिः २१ गुणितोजातोयमंकः ७७७ अयंचत्वारिंशता ४०
भक्तः लब्धंघटीपलात्मकं १९।२५।३० एतच्चतुर्थांशयुक्तसमागणे ४६।१५।० घटीपलादिषुयुतंजातं ४६।२५।३०
एतज्जन्मवारादिना ४।३७।५३ युतंजातोयमंकः ५१।१२।१८।३०। उर्ध्वांकेसप्ततष्टेशेषंवर्षप्रवेशवारादि
२।१२।१८।३०। अथतिथ्यानयनं गतवर्षगणः ३७ एकादशभिर्गुणितः ४०७ अयंस्वकीयसप्तत्यधि

कशतं १७० भागेन २ युक्तः ४०९ अयंजन्मकालीनशुक्लप्रतिपदमारभ्यवर्तमानतिथिभिः २ युक्तः ४११ त्रिं
शता ३० नष्टः शेषः २१ प्रमिताजातावर्षप्रवेशेकृष्णपक्षेषष्ठी· अस्यांतिथौपूर्वानीतवासरोनास्तिअग्रिमति
थौवर्ततेइतिकारणात्अस्यांतिथौ २१ एक १ युक्ता २२ जाताकृष्णपक्षेसप्तमीइयंयस्मिन्मासेभवेत्सएववर्षप्र
वेशेमासोज्ञेयः कदाचित्पूर्वमासेअग्रिममासेचभवतितत्रप्रमाणंवक्ष्यते· जन्मकालीनरविणासहतुल्योरविर्य
स्मिन्मासेभवतिसएववर्षप्रवेशेमासोज्ञेयः संवत् १६८५। शाके १५।५० माघकृष्ण ७ सोमेघटि ५ पलं ३९
विपले ३० हस्तनक्षत्रघटि १७ पले २८ सुकर्मयोगघटि २७ पले २८ अस्मिन्शुभेदिनेसूर्योदयाद्गतघटिषु १२
प· १८। विप ३० वर्षप्रवेशः· अथैतद्वर्षप्रवेशसमयेप्रमाणमाह· तत्कालेर्कोजन्मकालीनरविणास्याद्यतः
समः यतः यस्मात्कारणात्कालेवर्षप्रवेशसमयेकरणोक्तरीत्यासाधितः सूर्योजन्मकालरविणासमतुल्यो
राश्यंशकलाविकलात्मकोभवति इदमेववर्षप्रवेशसमयेप्रमाणं· अस्योदाहरणमग्रेप्रदर्श्यते· गणेशदैवज्ञैः
स्वकृततादजिक णेवर्षप्रवेशकालीनसूर्योजन्मकालीनसूर्योजन्मकालीनसूर्येणसहकलातुल्योनायाति
इतिज्ञात्वावर्षप्रवेशसमयेप्यन्यः संस्कारोप्युक्तः· तद्यथा· शाकेजन्मशकोनितेभवतियच्छेषंगताब्दप्रजोधो
धः संगुणितः शरैश्च युगुलेभंगेः ५।२।६। युगै ४ र्भाजितः॥ लब्धंतज्जननोत्थवारघटिकाद्येनान्वितः सप्त
भिः पूर्वांकेविहृतेत्रशेषकमितोवर्षप्रवेशोध्रुवः॥१॥ वर्षप्रवेशोत्थघटीपलाद्येकालेर्ककिलस्पष्टतरः स
भानुर्जनुर्भानुसमानएवः सिद्धांतरीत्यापरिसाधनीयः॥२॥ जन्मकालनलिनीविलासिनानेवयातितुल
ताकलासुचेत्॥ पर्वकालनलिनीपतिस्तयोरंतरंगतिहृतंयुतोनितं॥३॥ कार्यंवर्षध्रुवेनरत्स्यात्अंशौस्य

नी·ऊ· ष्टः प्रजायते॥ तत्कालसंभवैः खेटैर्भावेष्वफलनिर्णयः॥४॥ अथगणेशदैवज्ञानां संदेहदूरीकरणार्थं जन्म
कालीनसूर्यसमोवर्षप्रवेशकालीनसूर्यस्यविकलात्मकसाम्यप्रदर्शनार्थमुदाहरणंप्रदर्श्यते· जन्मसमयेसि
द्धांतरहस्यादहर्गणः॥२९२८ चक्रं सूर्योदयेमध्यमोर्कः ९।६।७।४३ देशांतरविकलाभिः २२युतः ९
६।८।१५ इष्टघटीभिः ३७।४३। चालितः जातस्तात्कालिकोर्कः ९।६।१७।२५। मंदकेंद्रं ५।११।१७।३५। मंद
॥६॥ फलंधनं २।२३। संस्कृतोर्कः ९।७।२७।४८। अयनांशाः १७।४९। चरखंडानि ७५।६०।२५। चरधनं २३८
संस्कृतोजातोजन्मसमयेस्पष्टोर्कः ९।७।३०।६। अथवर्षप्रवेशसमयेसिद्धांतरहस्यादहर्गणः इष्टघटीभिः
१२।१८।३० चालितः जातस्तात्कालिकोर्कः ३५९८५ चक्रं९ सूर्योदयेमध्यमोर्कः ९।६।३२।२८ देशांतर
विकलाभिः २२युतः ९।६।३३।३०। इष्टघटीभिः १२।१८।३० चालितः जातस्तात्कालिकोर्कः ९।६।४५।२३
मंदकेंद्रं ५।११।१४।३३ मंदफलधनं ४।२।२३ संस्कृतोर्कः ९।७।२७।५० अयनांशाः १८।२६। चरखंडा
नि ७५।६०।२५। चरधनं २३६ संस्कृतः जातोवर्षप्रवेशसमयेस्पष्टोर्कः ९।७।३५।६। अयंवर्षकालीन
सूर्यः पूर्वानीतजन्मकालीनसूर्येणसहतुल्योजातइति एतेनगणेशदैवज्ञमतंनिरस्तं· यदिवर्षप्रवेशोत्थे ॥६॥
घटीभिः पंचांगस्थितसूर्यस्यचालनंदत्वाजन्मकालीनसूर्येणसहतुल्यतानापेतिइतिदृष्ट्वावर्षप्रवेशोघ
टिकास्तुअन्यः संस्कारोयुक्तइतिचेदुच्यतेतत्रापिहेतुरुच्यते सौरः पक्षः आर्यः ब्राह्मादिपक्षाणांपरस्पर
मंतरेसतिजन्मकालीनसूर्यपंचांगस्थितसूर्ययोरंतरंपततिएकपक्षमंगीकृत्यउभयोः साधनंक्रिय

ते चेत्तदाअंतरंनपतति· ननुसौरपक्षाज्जन्मकालीनसूर्यः साधितः सौरपक्षात्पंचांगस्थसूर्योपिवर्तते
तत्रापिअंतरंपतती चेत्तत्रापिहेतुरुच्यते· येनयद्ग्रामस्थपंचांगंक्रियते तेनतद्ग्रामस्यदेशांतरसंस्कारे
ग्रहेषुक्रियतेग्रामेग्रामेचदेशांतरंभिन्नंभिन्नंइतिकारणात्अंतरंपततिउभयोरेकदेशस्यसंस्कारश्चेत्
क्रियतेतदाअंतरंसर्वथैवनपततितस्माद्ग्रंथात्साधितसूर्योजन्मकालीनोयावद्भिः संस्कारैः संस्कृतोभवे
तावद्भिः संस्कारैः संस्कृतस्तस्माद्ग्रंथांतराद्वर्षप्रवेशसमये साधितः सूर्योविकलात्मकःस्तुल्योभवतीति

गतैष्यदिवसाद्येनगतिर्निघ्नी खषट्हृता॥ लब्धमंशादिकंशोध्यं योज्यंस्पष्टोभवेद्ग्रहः॥१६॥
खषट्घ्नं भयातं भभोगोद्धृतं तत् त्वतर्कधिष्ण्येषुयुक्तं द्विनिघ्नं॥ नवाप्तं शशीभागपूर्वस्तुभुक्तिः
खखाभ्राष्टवेदा ४८००० भभोगेनभक्ताः॥१७॥

निश्चितं· अत्राप्यपूर्वमेवउदाहरणंदर्शितंअनयारीत्याद्वयोस्तुल्यताभवतीतिज्ञात्वादैवज्ञचक्रचूडामणि
भिः श्रीकेशवदैवज्ञैः अन्यैराचार्यैर्मान्यः संस्कारोवर्षप्रवेशसमयेउक्तः गणेशदैवज्ञैर्यदुक्तंतदसत्· अथ
वर्षप्रवेशसमयेस्पष्टग्रहाः साध्याः॥ तत्रादिसुखार्थंपंचांगस्थितग्रहेषुचालनमाह· गतैष्येति· गतैष्य
दिवसैः कृत्वाग्रहस्यकलादिकागतिर्गुण्याखषड्भिः ६० षष्ट्याभाज्यालब्धमंशा[illegible]कलाविकलात्मकंपं
चांगस्थितग्रहेशोध्यंयोज्यंवागतमंतरंतदाशोध्यंयदातेष्यमंतरंस्यात्तदायोज्यंसतात्कालिकः स्पष्टोग्रहोभ

नी· पु·

वेत्ववक्रगतिग्रहस्यराऊ केत्वोश्च चालनांकः मार्गग्रहापेक्षया विपरीतं· उदाहरणं॥ वर्षप्रवेशवारादिमध्ये
२।१२।१८। अवधिस्थ वारादिना ६।१२।५६ शोधिते चालनांकः २।५८।२२।
अनेन सर्वेग्रहाश्चालिताः अथ पंचांगस्थनक्षत्राच्चंद्रानयनमाह· ख खषट् इति· २
वर्षप्रवेशसमये यन्नक्षत्रं भवति तस्य नक्षत्रस्य इष्टकालावधि भुक्तघटिकाः कार्या
॥७॥ ताः षष्ट्या गुण्याः भभोगोत्थं तं नक्षत्रगतैष्ययोगेन भाज्याः यल्लब्धं तत्षष्टिगुणि
तं अश्विन्यादिगतनक्षत्रेषु युक्तं द्विनिघ्नं अश्विन्यादिनक्षत्रादिइष्टघटीपर्यंतं गत
घटिकाः भवंति ताः नवभिर्भक्ताः लब्धमंशाः शेषं षष्ट्या गुण्यं नवभिर्भाज्याः लब्धं

सू	चं	मं	बु	गु	शु	श	रा	के
९	५	५	८	८	७	६	२	५
७	२२	२०		२९	२०	६	२२	२२
३०	९	३२		३५	३१	५४	३५	३६
६	[illegible]	३६		१३	४८	३४	३६	३[illegible]
६१ ०७	८११ २०२			५९ ३३	७३ ५०	७० ३०	३ ११	३ ११

कलाः शेषं षष्ट्या गुण्यं नवभिर्भाज्याः लब्धं विकलाः एवं राशी चंद्रः भागपूर्वोंशादिकस्तात्कालिकः स्यात्· अ
थगतिसाधनं· खखखाभ्राष्टवेदा ४८००० भभोगेन नक्षत्रस्य गतैष्ययोगेन भक्ताः चंद्रस्य कलादिकाः स्पष्टा ॥७॥
त्ति गतिः स्यात्· उदाहरणं· वर्षप्रवेशसमये हस्तनक्षत्रं तस्य पूर्वदिने भुक्तघटिकाः ४९।२४। एता इष्टघटी
भिः १२।१८। युक्ताः इष्टघटीपर्यंतं हस्तनक्षत्रस्य भुक्तघटिका जाताः ५३।४२। एताः षष्ट्या गुणिताः ३२२२।
नक्षत्रपर्यंतं संख्यास्थ गतैष्य योगेन ५८।५२ सवर्णितेन भाज्याः १९।२३।२० भाजकौ ३५।३२। भजनाल्लब्धं
५४।४४।१। अश्विन्यादिगतनक्षत्रपर्यंतं संख्या १२ षष्ट्या गुणिताः ७२० पूर्वलब्ध्या ५४।१।४४। युक्ताः
७७४।४४।१। द्विगुणिताः १५४९।२८।२ नवभिर्भक्ताः लब्धमंशादिकं १।७२।१९।४७ अंशाः त्रिंशता भक्ताः ५

जातस्तात्कालिको राश्यादिश्चंद्रः ५।२२।१९।४७। अथ गत्यानयनं· खखखाभ्राष्टवेदा ४८००० नक्षत्रस्य गतै
ष्ययोगेन ५८।५२। भक्ताः लब्धा कलादिका चंद्रस्य· स्पष्टा गतिः ८।१५।२४। उक्तरीत्या साधितास्तात्कालिकाः
स्पष्टग्रहाः· अथ भावसाधनमाह· पूर्वमिति· १८ दिनखंडं दिनार्धं दिनगतघटिभिः हीनं कार्यं दिवसे पूर्वनतं
स्यात्· एवं रात्रिखंडं रात्र्यर्धं रात्रिगतघटिभिः हीनं कार्यं रात्रौ पूर्वनतं स्यात्· एतल्लक्षणं दिनार्धाद्रात्र्यर्धात्पूर्व
मिष्टकाले सति यदा दिनार्धादुपरि इष्टकाले [illegible] तदा सूर्योदयादिष्टघटीषु शोध्यं शोध्यं द्युखंडं दिनार्धं दिवसे
अपरं नतं पश्चिमनतं स्यात्· रात्र्यर्धादुपरि इष्टकाले सति सूर्यास्तादिषु घटीषु शोध्यं रात्र्यर्धं रात्रौ पश्चिमनतं
पूर्वं नतं स्याद्दिनरात्रिखंडं दिवानिशोरिष्टघटीविहीनं॥ दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रिखंडं त्व
परं नतं स्यात्॥१८॥ तत्काले सायनार्कस्य भुक्तभोग्यांशसंगुणात्॥ स्वोदयात्खवाग्नि ३० लब्धं य
द्भुक्तं भोग्यं रवेस्त्यजेत्॥१९॥ इष्टनाडीपलेभ्यश्च गतगम्यान्निजोदयात्॥ शेषं खव्योमाप्तं लग्नं भुक्तमभुक्तमे
स्यात्· अथ सप्तश्लोकैर्भावसंधिसाधनमाह· तत्कालेति· तात्कालिकोर्कः अयनांशैर्युक्तः कार्यः· तस्य भुक्तभोग्यां
शसंगुणात् इति· रात्रौ धनलग्नसाधनं [illegible] क्रियते तदा भुक्तांशा ग्राह्याः· यदा दिवा धनलग्नसाधनं क्रियते तदा भो
ग्यांशा ग्राह्याः ते· स्वोदयोगुणनीयः त्रिंशद्भक्तः रवेः भुक्तमथवा भोग्यं यल्लब्धं तत् इष्टनाडीपलेभ्यः त्यजेत् शोध
येत्· तदनंतरं शेषाद्गतगम्यान्निजोदयांस्त्यजेत्· तद्यथा· यदा भुक्तः कालः साध्यते तदा गुणितोदयात् स्वपश्चोदयाः
शोध्याः यदा भोग्यकालः साध्यते तदा गुणितोदयाद्यग्रिमोदयाः शोध्याः शोधिते यच्छेषं तत् खत्र्याहतं अशुद्धेन
यः शोधितो न शुध्यति स अशुद्धोदयस्तेन भक्तं फलं अंशादिकं ग्राह्यं तत् अशुद्धभे हीनं कार्यं शुद्धभे युक्तं कार्यं

।नी॰उ॰ तद्यथा धनलग्नसाधने मेषाद्गणनीयाय द्राशिसंख्याको अभुक्तोदयो भवति तद्राशिसंख्यामध्ये लवा
दिकं शोध्यं॰ धनलग्नसाधने मेषाद्गणनीयाय द्राशिसंख्याको अभुक्तः पूर्वोदयो भवति तद्राशिसंख्यामध्ये
लवादिकं शोध्यं तदनंतरं अयनांशकैः रहितं कार्यं तनुः लग्नं स्यात्॰ एवमनया रीत्या लंकोदयैः कृत्वा रवेर्भु
क्तं भोग्यं साध्यं तद्दशमं भवेत्॰ तद्यथा॰ यदा पूर्वनतं भवति तदा पूर्वनतं इष्टकालं प्रकल्प्य लंकोदयैः कृत्वा रवे
॥८ र्भुक्तं साध्यं॰ अन्या क्रिया धनलग्नवत्॰ यदा पश्चिमनतं भवति तदा पश्चिमनतं इष्टकालं प्रकल्प्य लंकोदयैः
कृत्वा रवेर्भोग्यं साध्यं॰ अन्या क्रिया धनलग्नवत् कार्या तद्दशमं भवेत्॰ अथ लग्नदशमभावावुक्त्वा अपरभावसा
अनुक्तभुक्तभेहीनयुक्तं तनुर्व्ययनांशकं॥ एवं लंकोदयैर्भुक्तमभुक्तेन लवादिकं॥२१॥ पूर्वपश्चा
न्नतादन्यत्प्राग्वत्तद्दशमं भवेत्॥ सषड्भे लग्नं जायातुर्यो लग्नोनतूर्यतः॥२२॥ षष्ठांशयु
क्तनुः संधिरग्रे षष्ठांशयोजनात्॥ त्रयः ससंधयो भावाः षष्ठांशोनैकयुक्तसुखात्॥२३॥
सषड्भेति॰ लग्नराशिषड्युते जातिसप्तमो भावो ति॰ खदशमं सषड्भं तुर्यं चतुर्थो भवति॰ एवं भावचतुष्टयं
जातं॰ अथ लग्नोन तूर्यतः लग्नं चतुर्थभावाच्छोध्यं शेषस्य षष्ठांशो राश्यादिस्तेन युक्तं तनुर्लग्नं कार्यं स लग्न ॥८॥
द्वितीयभावयोः संधिः स्यात्॰ लग्नस्य विरामसंधिर्धनभावस्यारंभसंधिरिति सर्वत्र ज्ञेयं अग्रे षष्ठांशयोज
नादिति॰ स एव आगतसंधिस्तेन षष्ठांशेन युक्तो ग्रे द्वितीयभावः स्यात्॰ द्वितीयभावः षष्ठांशेन युक्तो द्वितीयतृ
तीयभावयोः संधिः स्यात्॰ अयं षष्ठांशयुक्तः तृतीयभावः स्यात्॰ अयं षष्ठांशयुक्तः तृतीयचतुर्थभावयोः सं
धिः स्यात्॰ एवं त्रयः ससंधयो भावा जाताः तदनंतरं अग्रे त्रयः ससंधयो भावाः साध्याः तद्यथा॰ पूर्वानीतं षष्ठां

शतूर्यमध्ये संशोध्यं॰ अनेन राश्यादिना सुखभावो युक्तः॰ चतुर्थपंचमभावयोः संधिः स्यात्॰ अयमेव संधिः पुनस्तेन यु
क्तः पंचमभावः स्यात्॰ अयं तेन युक्तः पंचमषष्ठभावयोः संधिः स्यात्॰ एवं षट् संधयो भावा जाताः॰ एते भार्धयु
क्ताः भार्धेन द्वादशाद्याः संतः अवशिष्टषड्भावाः ससंधयः स्युः एवं भावसंधिनिष्पत्तेः प्रयोजनमाह॰ खेट इति॰ यो
ग्रहो यद्भावस्थो भवति स चेद्भावस्थराश्यंशविकलाभिः युक्तः स्यात् तदा स ग्रहस्तद्भावस्थ शुभमशुभं वा फलं पूर्णं
वितरति विश्वात्मकं ददाति॰ संधितुल्ये ग्रहे शून्यं फलं भवति॰ अथ सूर्यस्य भुक्तमथवा भोग्यं उक्तरीत्या चानीतं ते
न इष्टकालपलेभ्यो न शुध्यति तदा केनोपायेन लग्नसाधनं कर्तव्यमित्यत आह॰ भुक्तमिति॰ भुक्तं भोग्यं यदा इष्टना
डीपलेभ्यो न शुध्येत् तदा इष्टघटीपलानि त्रिंशद्गुणितानि कार्याणि सायनसूर्यस्य राश्युदयेन भाज्यानि फलं लवा
दिकं ग्राह्यं॰ हीनं युक्तं भास्करे कार्यं॰ तद्यथा॰ यदा रवेर्भुक्तमानीतं भवति तदा लब्धांशफलं सूर्यमध्ये हीनं कार्यं य
दा भोग्यमानीतं भवति तदा लब्धांशं सूर्यमध्ये युक्तं कार्यं तत्तनुः स्यात् रात्रौ लग्नसाधनं चेत् क्रियते तदा राशिषट्
युक्ताद्रवेः सकाशाल्लग्नं साध्यं॰ रात्राद्दशमलग्नसाधने पि राशिषट्कयुताद्रवेः सकाशाद्भुक्तं भोग्यं साध्यं अत्रोदाह
रणं॰ अस्य जन्मभूमौ उदये तात्कालिकोर्कः ९।७।३०। अयनभागः १८।२६ युक्तः ०।२५।५६।६। अस्य भोग्यांशैः ४
३।५४। मकरराशिकृद्यो २९८ गुणितः १२।१०।२२।१२। अयं त्रिंशद्भक्तः जातो भोग्यकालः ४०।२२।४४। अथ
मिष्टनाडी १२।१८।३० पलेभ्यः ७३८।३० शोधिते शेषं ९८।७।१६। मकराग्रे कुंभोदयः ३३९ शेषाच्छोधिते शे
षं ४५९।७।१६। कुंभाग्रे मीनोदयः २०३ शेषाच्छोधिते शेषं॰ २५६।७।१६ मीनाग्रे मेषोदयः २०३ शेषाच्छो
धिते शेषं ५३।७।१६। मेषाग्रे वृषोदयः २३९ अयं शेषात् ५३।७।१६। न शुध्यति अतः शेषं ५३।७।१६ खघ्नाद

नी·जु·

तं ३० आतं २५।९३।३८। अभुक्तोदयेन २३९ भक्तं लब्धमंशादिकं ६।४७। इदं अभुक्तात्पूर्वं मेषाद्गणनया एकोरा
शिस्तेन युक्तं १।६।४०। इदं अयनांशैः १८ २६ हीनं जातं लग्नं १८।१४।४। राशिषट्कयुतं जातं जायाभवनं ६।१८।
१४।४। अथ दशमस्योदाहरणं तत्र लंकोदयाः दिनार्धं १२।४४। दिनार्धकृत घटीभिः १२।१८।३०। हीनं जातं पूर्वनत
तं ०।२।२५।३०। इयमिष्टकालः लंकोदयैः कृत्वा जातो भुक्तकालः २७९।१४।४०। अयमिष्टघटीभ्यः ०।२५।३०
उनभुक्तस्य तिअतः शेषं २५।३० त्रिंशद्गुणितं ७६५ स्वोदयेन ३२३ भक्तं फलं लवादिकं २।२२।६ इदं राश्यादि सूर्य
मध्ये ९।७।३०। हीनं जातं दशमलग्नं ९।५।८।०। इदं राशिषट्कयुतं जातं सुखभुवनं ३।५।८।०। लग्नहीनं चतुर्थभाव
स्य शेषं २।१६।५३।५६ इदं षड्भक्तं जातं लब्धं राश्यादि ०।१२।४८।५९। अनेन युक्तं लग्नं जातो लग्नस्य विरामसं
धिः १।२६।४१।१। अयं षष्ठांशेन युतो द्वितीयभावः १।१३।५२।२। अयं षष्ठांशेन युतो द्वितीयभावस्य संधिः १।
४६।४१। अयं षष्ठांशेन युतो जातस्तृतीयभावः २।९।३०।६। अयं षष्ठांशेन युतो जातस्तृतीयभावस्य संधिः

२।२२।१८।५९। प्रागानीतषष्ठांशः ०।१२।४८।५९ अयं
अनेन सुखभावो युक्तो जातः सुखस्य संधिः ३।२२।१९।१।
४।१।३०।२०। जातः पंचमभावस्य संधिः ४।२६।४१।३०।
संधिः ६।११।३१।५। एते राशिषट्कयुक्ताः अवशिष्टभाव
अथ भावस्य ग्रहफलमाह· खेटेइति खेटे संधिद्वयांत
काशात् अधिके सति पूर्वापरे भावे फलं भवेत्· तद्यथा·

स्वदेशोदयाः		लंकोदयाः		काश्यादौ
मे २०३	मी	मे २७८	मी	मे २२१
वृ २३९	कुं	वृ २९९	कुं	वृ २५३
मि २९८	म	मि ३२३	म	मि ३०४
क ३४८	ध	क ३२३	ध	क ३४२
सिं ३५१	वृ	सिं २९९	वृ	सिं ३४५
क ३५३	तु	क २७८	तु	क ३३५

रूपाद्यो धितः शेषं ०।१७।११।१।
अयं तेन युक्तो जातः पंचमभावः
अयं तेन युक्तो जातो रिपुभावस्य
संधयो जाताः सर्वे एकत्र लिख्यंते·
स्थले तद्यथा· ग्रहे आरामसंधेः स
आरामसंधेः सकाशात्स्वयं हीने ॥९॥

॥९॥

२२
१७
१८

ल	ध	स	सु	पु	रि	जा	म	ध	कं	आ	व्य
०	१	२	३	४	५	६	७	८	९	१०	११
१९	१३	८	५	८	१३	१८	१७	[illegible]	५	८	१३
३	४५	२६	८	२६	५३	३	४५	२६	८	२६	४५
५४	१६	३८	०	३८	४	५४	१६	३८	०	३८	१६
सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं
१	१	२	४	४	६	७	७	८	[illegible]	१०	०
१	२६	२२	१	२६	७	४	२	२२	[illegible]	२६	०
५४	३५	७	२३	३५	५४	५४	५४	७	[illegible]	३७	५५
१५	५७	१८	२८	५७	३५	३५	३५	१८	[illegible]	५७	३५

सति यद्भावे वर्तमाने तद्भावात्पूर्वे
भावस्य फलं ददाति यदा विरामसं
धेः सकाशात् संधिकेऽभवति तदा
अग्रिमभावे फलं ददाति २६ अथ
ग्रहाणां विंशोपकात्मकभावफल
माह· ग्रहसंध्यंतराविति· उदाहरणं
इयमेव व्याख्या· सूर्यः ९।७।३०।६।
अस्य संधिः ९।२२।१७।१९। अनयो
रंतरं ०।१४।४७।१३। विंशत्या २०

अग्रे भयः पृष्ठे वंते भार्धयुक्ताः परे पि षट् ॥ खेटे भावसमे पूर्णं फलं संधिसमे तु खं ॥ २४ ॥
भुक्तं भोग्यं स्वेष्टकालात् लब्धे त्रिंशात्निघ्नात्स्वोदयाप्तं लवाद्यं ॥ हीनं युक्तं भास्करे तत्तनुः स्या
द्भोग्ये लग्नं भार्धयुक्तादि वेद्यं ॥ २५ ॥ खेटे संधिद्वयांतस्थे फलं तद्भावजं भवेत् ॥ हीने धिके
द्विसंधिभ्यां भावे पूर्वापरे फलं ॥ २६ ॥ ग्रहसंध्यंतरं कार्यं विंशत्या २० गुणितं भवेत् ॥
गुणितं ९।२२।४।२०। भाव ९।५।८।०। संधिः ९।२२।१७।१९।४। अनयोरंतरेण १७।९।१९। भवेत्स वर्णितो
भाज्य ९।६।४।६।० ६० भाजको ६।१७।५९। भाजकेन भाज्ये हृते यदाप्तं फलं तदेव विंशोपकाख्यता: १७।१४।२७।
एवं शशीनामपि· अथ विंशोपकात्मकानि भावफलानि लिख्यंते· अथ ग्रहाणां बलं वक्ष्याति तत्र ग्रहबलं अ

नी॰ उ॰ धिकारं विना न भवति। ते चाधिकाराः पंच। यथा स्वग्रहोच्चं स्वद्रेष्काणे राशिकमुसल्लुहं चेति। अधिकारं विना ग्रहो न ब
लीतत्रादौ राशिईशानाह। भौमोशनर इति। मेषस्य भौमः वृषस्योशना शुक्रः। मिथुनस्य सौम्यो बुधः। कर्कशशी
चंद्रः। सिंहस्य सूर्यः। कन्यायाः वित्‌ बुधः। तुलायाः सितः शुक्रः। वृश्चिकस्यारो भौमः। धनस्य गुरुः। मकरस्यार्किः शनिः
कुंभस्य मंदः। मीनस्यांगिरसो गुरुः। एते ग्रहेश्वराः द्वादशराशिस्वामिनो भवंति। अथ द्रेष्काणस्वामिन उच्यंते आद्या
॥१२०॥ इति। राशेस्त्रिंशांशो दशांशात्मको द्रेष्काण उच्यते। एकस्मिन्‌ राशौ कियत्संख्याकोस्तीति विचार्यमाणे प्रथमश्चेत्‌
भौमात्‌। द्वितीयश्चेद्रवेः तृतीयश्चेद्गुरुकात्‌ अनया रीत्या क्रियतः मेषादिद्वादशराशिषु द्रेष्काणपा द्रेष्काणस्वामिनो भवंति २९
भावसंध्यंतरेणात्तं फलं विंशोपकास्मृताः ॥२७॥ भौमोशनः सोम्यशशीनवित्सितारेज्यार्किमंदांगिरसो
ग्रहेश्वराः ॥ आद्याः कुजार्कारवितोपि मध्यमाः सिता तृतीयाः क्रियतो द्रकाणपाः ॥२८॥ सूर्यादितुंगर्क्ष
मजोक्षनक्र कन्याकुलीरांत्यतुलालवैः स्युः ॥ दिग्भिः १० गुणे ३ रष्टयमे २८ शरैकै १५ भूते ५ र्भसंख्ये २७ २०
अथ ग्रहाणामुच्चनीचभागांश्चाह। सूर्यादितुंगर्क्षमिति। सूर्यादीनां ग्रहाणां तुंग गर्क्ष उच्चराशयः स्युः। सूर्यस्य अजो
मेषः उच्चं दिग्भिः दशभिरंशैः गुरोः कुलीरं कर्कः उच्चभमेः पंचभिरंशैः शुक्रस्यां त्यमीन उच्चभसंख्यैः सप्तविंशति ॥१२०॥

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
मं	बु	गु	शु	श	र	चं	मं	बु	गु	शु	श
र	चं	मं	बु	गु	शु	श	र	चं	मं	बु	गु
शु	र	र	चं	मं	बु	गु	शु	श	र	चं	मं

सू	चं	मं	बु	गु	शु	श	
०	१	९	५	३	११	६	प र
१०	३	२८	१५	५	२७	२०	मो
२०	६	७	३	११	१०	०	
३०	९	३०	२८	१५	५	२०	मू त्रि

भिरंशैः शनेस्तुला उच्चं नखसंमितैः विं
शतिभिरंशैः परमोच्चमिति सर्वत्र ज्ञेयं २९
अथ ग्रहाणां नीचस्थानानि उच्चबला
नयनं नवांशस्वामिनश्चाह। तत्स्थ
ममिति। तेषां सूर्यादुच्चराशीनां सप्त

मस्तुलाद्यः कोराशिनीचअंशास्त एव। यथा सूर्यस्य तुला नीचं दशभिरंशैः परमं एवं ८ चंद्रादीनां ज्ञेयानि नीचा
न्यानि। अनेन नीचेन ग्रहोनीचश्चेद्रसभाधिकस्तदा चक्राद्द्वादशराशिभ्यः शोध्यः शेषस्यांशाः कार्याः नवभि
र्भक्तं लब्धंक लाद्युच्चबलं स्यात्‌। अथ नवांशा उच्यंते। क्रियतः क्रियो मेषः इनो मकरः तौलिस्तुला इंदुभं कर्कः
एते मेषादीनां त्रिराशिरावृत्या आद्या भवंति। ते यथा मेषसिंहधनुर्षामाद्यो मेषः वृषकन्यामकरराशीनां आद्यो मकरः
मिथुनतुलाकुंभराशीनामाद्यः तुला। कर्कवृश्चिकराशीनामाद्यः कर्कः। अथ षड्भिः श्लोकैः मेषादिराशीनां हद्दे
शानाह। मेष इति। युग्म इति। सिंह इति। चाप इति। कुंभ इति ३६ ॥ अंकस्थापनमेव व्याख्या। मेषराशौ प्रथम षड
तत्स्थसप्तमं नीचमनेन हीनो ग्रहोधिकश्चेद्रसभाद्विशोध्यः ॥ चक्रात्त दशांके ९ लवो बलं स्यात्‌ क्रियेणतौली
इभतो नवांशाः ॥३०॥ मेषेंगतर्काष्टशरेषुभागाजीवास्फुजिज्ज्ञारशनैश्वराणां ॥ वृषेष्टषण्नागशरानलां
शाः शुक्रज्ञजीवार्किकुजेशहद्दाः ॥३१॥ युग्मेषडंगेषुनगांगभागाः सोम्यास्फुजिज्जीवकुजार्किहद्दाः ॥
कर्केद्रितर्कांगनगाब्धिभागाः कुजास्फुजिज्ज्ञेज्यशनैश्वराणां ॥३२
शानां जीवो गुरुः। ततः षडंशानामास्फुजित्‌ शुक्रः ततोष्टानामंशानां ज्ञो बुधः ततः पंचानामारो भौमः ततः पंचानांशनैश्चरः स्वामी एवं मेषवृषादिष्वपि अ
थपंचवर्गबलमाह। त्रिंशादिति। स्वभे स्वराशौ ग्रहे त्रिंशल्लवाः ३० बलं। द्रेष्काणे स्व
द्रेष्काणे दश १० बलं। आत्मतुंगे विंशतिः २० बलं। स्वहद्दायां १५ अक्षचंद्राः १५
स्वद्रेष्काणे दश १० बलं। मुसल्लुहे पंचलवाः ५ बलं। प्रदिष्टाः उक्ताः ॥ ॥

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
गु६	शु८	बु६	मं७	गु६	बु७	श६	मं७	गु१२	बु७	बु७	शु१२
शु६	बु६	शु६	शु६	शु५	शु१०	बु८	शु४	शु५	गु७	शु६	गु४
बु८	गु८	गु५	बु६	श७	गु४	गु७	बु८	बु४	शु८	गु७	बु३
मं५	श५	मं७	गु७	बु६	मं७	शु७	गु५	मं५	श४	मं५	मं९
श५	मं३	श६	श४	मं६	श२	मं२	श६	श४	मं४	श५	श२

स्वनवांशस्थे

नी॰उ॰ वेदलवैः बलस्य चतुर्थांशतो विंशते विंशोपकाः प्रकल्प्याः॰ यदा ग्रहः स्वगृहे स्वोच्च हद्दा स्वद्रेष्काण स्वनवांशेषु
पंचाधिकारेषु कुत्रापि नास्ति तदा बलमाह॰ स्वस्वाधिकारोक्तमिति॰ स्वस्वाधिकारोक्तबलस्य विभागः सुहृद्दपादो
नं चतुर्थांशोनबलं ग्राह्यं॰ समभे समस्य गृहे अर्धं अरिभे शत्रुगृहे अंघ्रिः चतुर्थांशो बलं स्यात्॰ मित्रगृहे पादोनं सा
॥११॥ र्धद्वाविंशति २२।३० समभे अर्धं पंचदश जाताः १५ शत्रुगृहे चतुर्थांशः सार्धसप्त जाताः ७।३० तथा स्वहद्दायां पंचद
सिंहे गभ्रताद्रिरसांगभागाद्वेज्यभृग्वार्किबुधारहद्दाः॥ स्त्रियां नगाशाब्धिनगाक्षिभागाः सौम्योशनो
जीवकुजार्किहद्दाः॥ ३३॥ तुले रसाष्टाद्रिनगाक्षिभागाः कोणज्ञजीवास्फुजिदारनाथाः॥ कीटे नगाब्ध्य
ष्टशरांगभागाः भौमास्फुजिज्ज्ञेज्यशनैश्चराणां॥ ३४॥ चापे रवीषुधृति पंचवेदा जीवास्फुजिज्ज्ञारश
नैश्चराणां॥ मृगे नगाद्र्यष्टयुगाश्रुतीनां सौम्येज्यभृग्वार्किकुजेशहद्दाः॥ ३५॥ कुंभे नगांगाद्रिशरेषु
भागाज्ज्ञभृग्वीज्यजीवारशनैश्चराणां॥ मीने र्कवेदानलनंदपक्षाः सितेज्यसौम्यारशनैश्चराणां॥ ३६॥ त्रिंश
त्स्वभे विंशतिरात्मतुंगे हद्देषु चंद्रा १५ दश कं १० द्रकाणे॥ मुसल्लहे पंचलवाः प्रदिष्टा विंशोपका वेदल ॥३८॥ ॥११॥
वैः प्रकल्प्याः॥ ३७॥ स्वस्वाधिकारोक्तबलं सुहृद्दपादोनमर्धं समभेरिभेंघ्रिः॥ एवं समानीय बलं तदैक्ये वेदा
१५ मित्रहद्दायां सपाद एकादश ११।१५। समहद्दायां सार्धसप्त ७।३०। शत्रुहद्दायां पंचपादोनचत्वारः ३।४५। तथा
स्वद्रेष्काणे दश १० मित्रद्रेष्काणे सार्धसप्त ७।३०। समद्रेष्काणे पंच ५ शत्रुद्रेष्काणे सार्धद्वयं २।३०। एवं स्वनवांशे पंच ५
मित्रनवांशे पादोनचत्वारः ३।४५। समनवांशे सार्धद्वयं २।३०। शत्रुनवांशे सपादमेकं १।१५। बलं स्यात्॰ एवं चतुर्वर्ग

बलं समानीय तदैक्ये पंचानां योगे वेदोद्धृते एतच्चतुर्भिर्भक्ते यल्लब्धं तद्विंशोपकात्मकं बलं भवति शरोनं पंचभ्यो
न्यूनं हीनबलो ग्रहो ज्ञेयः॰ उक्तं च॰ पंचात्मे हीनवीर्यः स्यादधिकं मध्यमुच्यते॰ दशाधिके बली प्रोक्तं पंचवर्गबलाद्द्भव
ति॰ अथ क्रमप्राप्तमुदाहरणं॰ तद्दर्शनार्थं वक्ष्यमाणमेत्रत्समशात्र्ववालिख्यंते॰ उदाहरणं १।७।३०।६। अस्य मकरराशौ
स्थितत्वात् ग्रहं पंचवर्गबलं च क्रं॰ होरेशः शनिः अयं सूर्यस्य शत्रुः अतः कारणात् गृहे प्राप्तं बलं सार्धसप्त ७।३०।
अथोच्चबलं सूर्यस्य स्वनीचं ६।१०। अनेन हीनो रविः २।२७।३०।६। अस्यांशाः ८७।३०।६। नवभिर्भक्ताः जाताः सूर्यो
च्चबलं ९।४४।३३। अथ सुहृद्दशाबलं मकरराशौ सूर्यस्य सप्त अंशाः त्रिंशत्कलाः वर्तते मकरराशौ सुहृत्स्वहद्दायां माद्दे
अथ द्वादशवर्गी॥ क्षेत्रं होरा त्र्यब्धिपंचांगसप्तवस्वंकाशाशार्कभागाः सुधीभिः॥ विज्ञातव्या लग्नसं
स्थाः शुभानां वर्गाः श्रेष्ठाः पापवर्गाः अनिष्टाः॥ १॥ ओजे रवींद्वोः समे इंदुरव्योर्होरे गृहार्धप्रमिते विचिं
त्यौ॥ द्रेष्काणपाः स्वेषुनवर्क्षनाथाः तुर्यांशपाः स्वर्क्षजकेंद्रनाथाः॥ २॥
सप्तांशा सप्ताधिको अग्रिम सप्तसप्तम मध्ये वर्तते इति कारणात् जातो हद्देशो गुरुः अयं सूर्यस्य समो भवति सम
हद्दायां प्राप्तं बलं ७।३०। अथ त्रैराशिकबलं॰ मकरराशौ प्रथमं एकमध्ये वर्तते तद्देशो गुरुः अस्य समत्वात् प्राप्तं
त्रैराशिकबलं॰ अथ मुसल्लहबलं॰ नवमांशगणनया जातो मुसल्लहेशो गुरुः अस्य समत्वात् प्राप्तं नवांशबलं २।३०। पं
चानां योगः ३२।१३। चतुर्भिर्भक्तो जातं सूर्यस्य विंशोपकात्मकं बलं ८।३। एवं चंद्रादीनामपि ज्ञेयं॰ अथ द्वादशव
र्गचक्रमाह॰ क्षेत्रमिति॰ क्षेत्रं गृहं॰ होरा॰ त्रिलवः॰ चतुर्लवः॰ पंचलवः॰ षड्लवः सप्तलवः अष्टलवः अंकलवः दशम
लवः एकादशलवः द्वादशलवः एते द्वादशभागाः लग्नसंस्थाः लग्नसमये विद्यमानग्रहाणां सुधीभिः विज्ञातव्याः शुभाः

नी॰ ३

स्व	मि	स	श	अधि
३०	२२ ३०	१५ ०	७ ३०	ग्र
१५	२२ १५	७ ३०	३ ४५	ह:
२०	७ ३०	५ ०	२ ३०	त्रे
५	४० ४५	२ ३०	१० १५	मु

सू	चं	मं	बु	गु	शु	श	ग्र
चं	गु	श	श	शु	रवं	मं बु	मि
मं बु गु	श	र शु	र शु	चं श बा गु	मं गु बु श	चं श	स
श	मं बु शु	मं बु मं गु	चं बु मं	मं बु चं	०	सू	श

॥१२॥

शुभग्रहाणांवर्गाः श्रेष्ठाः शुभफलदाज्ञेयाः॰ अथहोराद्रेष्का णचतुर्थांशानामीशानाह॰ ओजेरवीन्द्वोरिति॰ तद्यथा॰ प्रथमं रवेः परत्वं इन्दुस्य तथा समराशौ चंद्ररव्योर्विचिन्त्ये॰ अथद्रे ष्काणेशा उच्यंते॰ राशेः त्रिंशद्भागेषु दशांशपरिमितोद्रेष्का णोज्ञेयः॰ यस्य द्रेष्काणविचारः क्रियतेसचेत्प्रथमविभाग मध्येतस्मिन्द्राशौतिष्ठतितद्राशिस्वामिनएवद्रेष्काणश्चेत्तदास्वराशेः सकाशात्नवमोयोराशिः तत्स्वामिनएवद्रेष्का णाधीशत्वं॰ द्वितीयद्रेष्काणश्चेत्तदास्वराशितः पंचमोयोराशिस्तत्स्वामिनएवद्रेष्काणाधीशत्वं तृतीयद्रेष्काणश्चेत् तदास्वराशेः सकाशात्नवमोयोराशिः तत्स्वामिनएवद्रेष्काणाधीशत्वं॰ अथचतुर्थांशस्वामिनउच्यंते॰ स्वर्क्षजकें द्रनाथाइति॰ स्वर्क्षंग्रहाधिष्ठितोराशिः तस्माज्जातानिकेंद्राणितन्नाथाएव चतुर्थांशस्वामिनः॰ तद्यथा॰ राशेः त्रिंशांशाः तस्य चतुर्थांशाः सार्धसप्तांशाः ७।३० तत्रप्रथमविभागमध्ये ७।३० स्वर्क्षराशिस्वामिनः स्वाधिपत्यं द्वितीयविभागः १।१५। मध्येकेंद्रनाथाः स्वराशेः सकाशात्चतुर्थोंशोयोराशिस्तत्स्वामिनएवाधिपत्यं तृतीयविभागमध्ये २२।३० स्वराशेः सकाशात्स प्तमोयोराशिस्तत्स्वामिनएवाधिपत्यं चतुर्थविभागमध्येस्वराशेः सकाशात् दशमोयोराशिस्तत्स्वामिनएवाधिपत्यं॰ अथपंचमांशेशाद्वादशांशेशानाह॰

सू	चं	मं	बु	गु	शु	श	ग्रहः
७ ३०	७ ३०	७ ३०	७ ३०	३० ०	१५ ०	१५ ०	गृह
८ ४३	४ ३२	१५ २०	१० १८	० ३६	६ २३	१८ ३२	उच्चं
७ ३०	३ ८५	७ ३०	७ ३०	० ३६	७ ३०	१५ ०	हद्दा
५ ०	२ ३०	२ ३०	२ ३०	१५२ ०	१० ०	३ ३५	त्रैरा
५ ३०	५ ३०	५ ३०	१ १५	७१ ३०	२ ३०	५७ १७	द्रेष्का सस
३२ १३	२३ १७	२५ ३०	३० ३	५ ०	४१ २३	२४	योग
८ ३	५ ४८	८ ४७	७ १५	१८ ६	१ ३०	१२	विंशो

॥१३॥

ओजर्क्षइति॰ पंचमांशप्रमाणषडंशाः ६ एवंराशौपंचभवंति तत्रोजर्क्षेविषमराशौप्रथमपंचमांशस्वामीकुजः॰ द्वितीयपंचमांशस्वामीआर्किःशनिः॰ तृतीयपंचमांशस्वामीईज्योगुरुः॰ चतुर्थपंचमांशस्वामीज्ञोबुधः॰ पंचम स्वामीपंचमस्वामीआर्कीशनिः पंचपंचमांशस्वामीभार्गवः शुक्रः समभेसमराशौव्यत्ययाद्वलतीत्याज्ञेयाः तद्यथा॰ समराशौप्रथमपंचमांशस्वामीशुक्रः द्वितीयपंचमांशस्वामीबुधः॰ तृतीयपंचमांशस्वामीगुरुः॰ चतुर्थ पंचमांशस्वामीशनिः पंचमपंचमांशस्वामीकुजोभौमः॰ अथद्वादशांशस्वामिनउच्यंते॰ द्वादशांशाः स्वभात्स्वराशेः सकाशात्स्मृताः॰ यथाद्वादशांशप्रमाणंसार्धमंशद्वयंएवंएकराशौद्वादशभवंति॰ तद्यथा॰ एतत्प्रमाणेन २।३० यत्

ओजर्क्षेपंचमांशेशाः कुजार्किज्यज्ञभार्गवाः॥ समभेव्यत्ययात्ज्ञेयाद्वादशांशास्स्वभात्स्मृताः॥ ४१॥ ल

वीकृतोव्योमचरोंगशैलवस्वंकदिग्रुद्रगुणः स्वरामेः॥ भक्तोगतास्तर्कनगाष्टनंददिग्रुद्रभागाः कुयुताः

क्रियात्स्युः॥ ४२॥ एवंद्वादशवर्गस्याद्ग्रहाणांबलसिद्धये॥ स्वोच्चमित्रशुभाः श्रेष्ठाः नीचारिक्रूरतोशुभाः ४३

संस्थेअंशेग्रहस्तिष्ठतिस्वराशितस्तत्संराशेर्द्वादशांशोज्ञेयः॰ अथषट्सप्ताष्टनवदशैकादशांशेशानयनमाह॰ ल वीकृतइति॰ व्योमचरोग्रहेलवीकृतः तद्यथा॰ राशयस्त्रिंशद्गुणिताः अधस्थितांशयुताः एवंग्रहोअंशात्मकः कार्यः षट्स्थाने क्रमेणअंग ६ शैल ७ वसु ८ अंक ९ दिक् १० रुद्र ११ गुणः सर्वत्रस्वरामेः ३० त्रिंशद्भिः ३० भक्तोयल्लब्धंतेगतास्तर्कनगाष्ट ८ ० नंद ९ दिक् १० रुद्र ११ भागिभवंति॰ ते कुयुताएकयुक्ताः संतः क्रियान्मेषमारभ्यगणना ९ यांयत्रआंतिस्तद्राशिस्वामीतत्तद्वर्गस्यज्ञेयः॰ एकयुक्तलब्धंयदिद्वादशाधिकंभवतितदाद्वादशराशिभिस्तष्टंकार्यं उदाहरणं सूर्य १।७।६। एतस्यमकरराशौस्थितत्वात्गृहेशः शनिः अथहोरामकरराशौप्रथमपंचदशभागम्

नी·उ· ध्येस्ति अतो द्रेष्काणाधीशः शनिः अथ चतुर्थलवः सूर्यो द्वितीयचतुर्थांशमध्ये वर्तते अतः कारणात् मकरराशेः स
काशाच्चतुर्थो मेषस्तत्स्वामी भौमः एवं जातश्चतुर्थलवस्वामी भौमः अथ मांशाः सूर्यः समराशौ द्वितीयभागमध्ये व
र्तते अतः पंचमांशस्वामी बुधः अथ षडंशः अस्यांशाः २७।७।३०।६। षड्गुणिता १६।६।५७।३६। त्रिंशद्भक्ताल्लब्धं ५५
कुयुतं ५६। द्वादशभिस्तष्टं मेषाद्गणनया जातो वृश्चिकराशिस्तत्स्वामी भौमः एवं जातः षडंशस्वामी भौमः अथ सप्तमांशः
अंशाः २७।७।३०।६। सप्तभिर्गुणिता १९।४२।३२।४२। त्रिंशद्भक्ताः ६ लब्धं ६४ कुयुतं ६५ द्वादशभिस्तष्टं ५ मेषाद्गणनया
॥९३॥ जातः सिंहराशिः तत्स्वामी सूर्यः अथाष्टमांशः अंशाः २७।७।३०।६। अष्टभिर्गुणिता २२।२०।४८। त्रिंशद्भक्ताल्लब्धं ७४
कुयुतं ७५ द्वादशभिस्तष्टं शेषं ३ मेषाद्गणनया जातो मिथुनराशिः तत्स्वामी बुधः एवमष्टमांशस्वामी बुधः अथ नवमांशः
अंशाः २७।७।३०।६। नवभिर्गुणिता २४८।७।३०।५४। त्रिंशद्भक्ताल्लब्धं ८३ कुयुता ८४ द्वादशभिस्तष्टाः शेषं ० मेषाद्गण
नया तो जातो मीनराशिः तत्स्वामी गुरुः एवं जातो नवमांशस्वामी गुरुः अथ मांशाः २७।७।३०।६। द्वादशभिर्गुणिता
२७।७।११।०। त्रिंशद्भक्ताल्लब्धं ९२ कुयुता ९३ द्वादशभिस्तष्टाः शेषं ९ मेषाद्गणनया जातो धनुराशिः तत्स्वामी गुरुः
एवं जातो दशांशस्वामी गुरुः अथ एकादशांशाः अंशाः २७।७।३०।६। एकादशभिर्गुणिता ३०।५२।३१।६। त्रिंश ॥९३॥
द्भक्ताल्लब्धं १०११ कुयुतं १०२ द्वादशभिस्तष्टं शेषं ६ मेषाद्गणनया जातः कन्याराशिः तत्स्वामी बुधः एवं जातैकादश
स्वामी बुधः अथ द्वादशांशाः एवं द्वादशांशविभागगणनया चतुर्विभागमध्ये वर्तते अतः मकराद्गणनया जातश्च
तुर्थो मेषराशिः तत्स्वामी भौमः एवं चंद्रादीनामपि ज्ञेयं · अथ द्वादशवर्गफलमाह · एवमिति · एवं ग्रहाणां बलसि
द्धये द्वादशवर्गः स्यात् परा द्वादशवर्गः स्वोच्चनिजशुभांशे षा · तद्यथा · यस्य ग्रहस्य द्वादशवर्गः क्रियते सच बला

दिषु अथवा स्वोच्चवर्गे अथवा मित्रवर्गे अशुभग्रहस्य वर्गे तिष्ठति तदा श्रेष्ठा शुभफलदात्री स ग्रहो यदि नीच
वर्गे अथवा पापग्रहस्य वर्गे चेत्तिष्ठति तदा अशुभफलदात्री · अथ द्वादशवर्ग्याः शुभपापवर्गफलनिर्णयः कथं
स्यादित्यत आह · ॥४४॥ एवमिति · एवं ग्रहाणां शुभपापवर्गपंक्तिद्वयं वीक्ष्य · तद्यथा · पूर्वोक्तप्रकारेण ग्रहाणां
द्वादशवर्गः कार्या · तत्र गृहहोरादिद्वादशस्थानेषु कियंतः शुभग्रहवर्गाः कियंतः पापग्रहवर्गाः इति विचार्य शुभ
ग्रहसंख्याभिन्ना लेख्या अशुभग्रहाणां भिन्ना · पंक्तिद्वयस्यांतरं कार्यं यदि शुभाधिकत्वं शुभग्रहशेषं तदा तत्र

एवं ग्रहाणां शुभपापवर्गपंक्तिद्वयं वीक्ष्य शुभाधिकत्वे। दशाफलं भावफलं च
वाच्यं शुभं त्वनिष्टं त्वशुभाधिकत्वे॥४४॥ क्रूरोपि सौम्याधिकवर्गशाली शुभो
ति सौम्यः शुभखेचरश्चेत्॥ सौम्योपि पापाधिकवर्गयोगात्नेष्टो तिनिंद्यः खल
लु पापखेटः॥४५॥

ग्रहस्य दशाफलं भावफलं च शुभाधिकत्वे शुभं वाच्यं · यदि पापग्रहाधिकत्वं पा
पग्रहस्य शेषं यथावशिष्टं तदा तद्ग्रहस्य दशाफलं चानिष्टमेव · अथ ग्रहभेदेन
सौम्यपापवर्गभेदेन च फलतारतम्यमाह · क्रूरेति · यस्य ग्रहस्य द्वादशवर्गिका
क्रियते स खलु क्रूरोपि यदा पापग्रहो भवति द्वादशवर्ग्यां सौम्यग्रहाधिकवर्गेण शा
ली तेषु कोभवति तदा शुभः शुभफलदः अशुभखेचरश्चेत् तद्यथा यस्य ग्रहस्य

सू	चं	मं	बु	गु	शु	श	ग्रहाः
श	बु	गु	गु	र	मं	बु	गृह
चं	र	र	र	चं	सू	सू	होरा
श	शु	सू	मं	र	चं	शु	द्रेष्का
मं	गु	गु	गु	शु	मं	सू	चतु
बु	श	गु	गु	शु	मं	सू	पंच
मं	श	बु	र	गु	शु	शु	षष्ठ
र	र	गु	श	बु	सू	शु	सप्त
बु	श	र	मं	सू	बु	शु	अष्ट
गु	चं	र	चं	सू	श	गु	नव
गु	श	र	बु	बु	र	बु	दश
बु	चं	श	शु	गु	र	बु	एका

नी॰ ५ द्वादशवर्गिका क्रियते स यदि शुभग्रहो भवति द्वादशवर्ग्यां शुभाधिकवर्गप्राप्तो भवति तदा अतिसौम्यः अत्यंत
शुभफलदाता · सौम्योपि पापाधिकवर्गयोगान्नेष्टः · तद्यथा · यस्य द्वादशवर्गिका क्रियते स यदि शुभग्रहो भवति द्वा
दशवर्ग्यां पापग्रहाधिकवर्गप्राप्तो भवति तदा अतिनिंद्यः अत्यंत दुष्टफलदाता · अथ द्वादशभावानां शुभाशु
भफलमाह · राशीशमित्रोच्चेति · तनोर्लग्नस्याप्यनयैव रीत्या शुभग्रहाधिकवर्गपापग्रहाधिकवर्गशालित्वेन शु
॥१४॥ भाशुभफलं विचिंत्यं विचार्यं · यथा लग्नं शुभग्रहाधिकवर्गशालि [illegible] स्यात् अथवा लग्नस्वामी शुभग्रहः सन्
मित्रग्रहे वा स्वोच्चे वा तदा अत्यंतं शुभफलं ज्ञेयं · यदि लग्नस्वामी समग्रहे तदा शुभाशुभफलाभावात् यदि पा

राशीशमित्रोच्चरिपुक्रमेण चिंत्यं तनोरप्यनयैव युक्त्या ॥ भावेषु सर्वेष्वपि वर्गचक्रं विलोक्य तत्तत्फ
लमूहनीयं ॥ ४७ ॥ इति द्वादशवर्गः ॥ अथ भावस्वरूपं · शरीरवर्णचिह्नायुर्वयोमानसुखासु
खं ॥ जातिशीलं च मतिमान् लग्नात्सर्वं विचिंतयेत् ॥ ५

पग्रहाधिकवर्गः स्यात् अथवा स्वामी पापग्रहः सन् शत्रुग्रहे नीचे वा तदा अशुभफलं ज्ञेयं · एवं सर्वेष्वपि भावेषु ॥१४॥
लग्नद्रेष्काणादि द्वादशभावेषु वर्गचक्रं द्वादशवर्गं कार्यं तान् दृष्ट्वा तत्तद्भावस्य शुभाशुभफलं अनयैव रीत्या ऊ
हनीयं विचारणीयं · इति प्रश्नद्वादशवर्गिका ॥ अथ लग्ने किं कार्यमित्यत्राह · शरीरेति · वर्षलग्नं प्रश्नलग्नं
वा अंगीकृत्य शरीरादि सर्वं विचार्यं · तद्यथा · स्वशरीरं पुष्टं कृशं वा वर्णः रक्तः श्वेतः अमुक[illegible]निभा तिला
दि चिह्नं मशकादि आयुर्जीवनं कियत् वयोमानं बाल्ययौवनवार्धक्यमिति · सुखं असुखं जातिः ब्राह्मणादिः शी
लमाचरणं · एवं मतिमान् विद्वान् लग्नात्सर्वं विचिंतयेत् · अथ धनभावे किं किं विचार्यमित्यत आह · सुवर्णेति ·

सुवर्णरौप्यं रत्नानि धातुर्गैरिकादिः द्रव्यं कांस्यादि सखा मैत्री विचारः धनं धनमानं भवेत् एतावद्विचार्यं · अ
थ सहजभवने किं कार्यमित्यत आह · विक्रमे भ्रातृभृत्याध्वपित्र्यस्खलनं साहसं ॥ ४८ ॥ विक्रमे सहजभवने
एतावद्विचार्यं भ्राता सहजः भृत्यः सेवकः अध्वा यात्रा पित्र्यः पितुः संबंधि स्खलनं कार्यभ्रंशः साहसं साहस
कर्म एतानि सहजभवने विचार्याणि · अथ चतुर्थभवने किं कार्यमित्यत आह · पितृवित्तमिति · पितृवित्तं [illegible]
पितुर्द्रव्यं निधिर्निक्षिप्तवस्तु क्षेत्रं कृष्यादि गृहं भूमिः तूर्यतः चतुर्थस्थाने एतावद्विचार्यं · अथ पंचभवने किं

सुवर्णरौप्यरत्नादि धातु द्रव्यं सखा धने ॥ विक्रमे भ्रातृभृत्याध्वपित्र्यस्खलनसाहसं ॥ ४९ ॥
पितृवित्तं निधिक्षेत्रं गृहं भूमिं चतुर्थतः ॥ पुत्रे मंत्रधनोपायं गर्भविद्यात्मजेक्षणं ॥ ५० ॥ रिपौ मातु
लमांद्यादि चतुष्पात्स्वबंधभीव्रणान् ॥ द्यूने कलत्रवाणिज्यनष्टविस्मृतिसंकथाः ॥ ५१ ॥

विचार्यमित्यत आह · पुत्रे पंचमभवने एतावद्विचार्यं · मंत्रः धनोपायः गर्भः विद्या आत्मजः पुत्रः एतेषां ईक्षणं
अवलोकनं कार्यं · अथ षष्ठभावे किं विचार्यमित्यत आह · रिपुरिति · रिपौ षष्ठभावे एतावद्विचार्यं · मातुलः मांद्यं
रोगः अरिः शत्रुः चतुष्पाद् गवादि बंधः पराश्रयः भीर्भयं व्रणः क्षतं अथ सप्तमभवने एतावद्विचार्यमित्यत आ
ह · द्यूने सप्तमभवने एतावद्विचार्यं · कलत्रं जाया वाणिज्यं वणिक्कर्म नष्टं नष्टवस्तु विस्मृतिः विस्मरणं · एतेषां सक
नं हृतं हृतद्रव्यं अध्वा मार्गविचारः कलिः कलहः मार्गादि यात्राविचारः द्यूने सप्तमभवने शुभः पापो विद्यमानो
ग्रहः शुभः अशुभः अनिष्टफलदः ॥ अथाष्टमस्थाने किं विचार्यमित्यत आह · मृत्युरिति · मृत्यौ अष्टमभवने एताव

हू चार्यं चिरंतनं द्रव्यं मृतवित्तं मृतस्यावृत्तं रणः संग्रामः रिपुः शत्रुः दुर्गस्थानं मृतिर्मरणं नष्टवस्तु परिवारः कुटुंबं म
नो व्यथा मानसी व्यथा ॰ अथ नवमस्थाने किं विचार्यमित्यत आह ॰ धर्मे रतिरिति ॰ धर्मे नवस्थाने एतावद्विचार्यं ॰ धर्मे रतिः
क्रीडा पंथा यात्राविचारः धर्मोपायं धर्मसाधनं ५२ अथ दशमभावे किं विचार्यमित्यत आह ॰ व्योम्नीति मुद्रां परंपु
ण्यं उत्कृष्टं पुण्यं राज्यं शिविभाग्य वृद्धिः पैतृकं पितुः संबंधी ॰ अथैकादशस्थाने किं विचार्यमित्यत आह ॰ गजा आयेति ॰
 गजाश्वादि राज्ञः वित्तं राजद्रव्यं परिवारः कुटुंबविचारः भूरिशः भूयांसो लाभोपायाः अथ व्ययभवने क्रू
ह ताध्वकलिमार्गादि चिंत्यं संयूने ग्रहाः शुभाः ॥ मृत्यो चिरंतनं द्रव्यं मृतवित्तं रणो रिपुः ॥ ५२ ॥ दुर्ग
स्थानं मृतिर्नष्टं परिवारो मनो व्यथा ॥ धर्मे रतिस्तथा पंथा धर्मोपायं विचिंतयेत् ॥ ५३ ॥ व्यो
म्नि मुद्रां परं पुण्यं राज्यवृद्धिं च पैतृकं ॥ आये सर्वार्थधान्यार्घकन्यामित्रचतुष्पदाः ॥ ५४ ॥ रा
ज्ञो वित्तं परीवारो लाभोपायांश्च भूरिशः ॥ व्यये वैरिनिरोधार्तिव्ययादि परिचिंतयेत् ॥ ५५ ॥
लग्नांबुद्यूनकर्माणि केंद्रमुक्तं चकंटकं ॥ चतुष्टयं चात्र खेटो बली लग्ने विशेषतः ॥ ५६ ॥
अ॰ विचार्यमित्यत आह ॰ व्यय इति ॰ व्यये व्ययभवने एतावद्विचार्यं ॰ वैरिनिरोधः शत्रुकृतावरोधः आर्तिः पीडा व्यया
दि एतावत् परिचिंतयेत् ॥ इति तन्वादि द्वादशभावे विचारणीयाः पदार्थाः ॥ अथ बलिष्ठग्रहलक्षणमाह ॰ लग्नां
बुरिति ॰ लग्नं अंबु चतुर्थं द्यूनं सप्तमं कर्म दशमं एतेषां स्थानानां कंटकचतुष्टयं चेति संज्ञा मता ॰ अथ केंद्रस्थितः
खेटो ग्रहो बली ज्ञेयः तथापि चतुर्थसप्तमस्थानापेक्षया लग्नसंस्थो ग्रहो विशेषतो बली ज्ञेयः ॰ अथ ग्रहाणां
शुभस्थानानि वदन् बलिष्ठयोगमाह ॰ ५६ लग्नं कर्म दशमं अस्तं सप्तमं तुर्यं आय एकादशं सुतं पंचमं अंकं न

वमं एतत्स्थानस्थितो ग्रहः बली तत्र यथादिमस्थानमतिक्रम्य यथाक्रमम् अग्रिमस्थानापेक्षया पूर्वस्थो ग्रहो बलिष्ठः
तद्यथा आदौ नवमस्थो ग्रहो बलिष्ठः तदपेक्षया चतुर्थस्थः तदपेक्षया सप्तमस्थः तदपेक्षया दशमस्थः तदपेक्षया
लग्नस्थो ग्रहो बलिष्ठ इत्यर्थः एतत्तु सर्वग्रहाणां साधारणमुक्तं ॰ अथ चंद्रः सत्रिविलग्नेषु तृतीयद्वितीयसहितेषु ए
तेषु बली ज्ञेयः तत्र द्वितीये बलिष्ठः तदपेक्षया नवमस्थः तदपेक्षया पंचमस्थः ततः पूर्ववद् ज्ञेयः अथ भौमः कुजः
सत्रिषु सतृतीयस्थानसहितेषु प्रागुक्तेषु स्थानेषु बली च ज्ञेयः तत्र भौमः तृतीये बली तदपेक्षया नवमस्थः ततः
लग्नकर्मास्ततुर्यायसुतांकस्थो बली ग्रहः ॥ यथादिमं विशेषेण सत्रिवित्तेषु चंद्रमाः ॥ ५७ ॥
कुजः सत्रिषु पृष्ठछायां स्मृतो चान्यत्र चिंतयेत् ॥ भावा नवेश्वरा शक्ता स्युः रिःफाष्टरिपवोऽशुभाः ॥ ५८ ॥
दृष्टांशातिक्रमे शस्ताः स्मे पीतिति विचिंतयेत् ॥ एवं विधिश्च भावानां कथयंति न संशयः ॥ ५९ ॥
पूर्ववज् ज्ञेयः एवमेव स्थानग्रहदृष्टछायां बलिष्ठं ॰ लग्नस्तौ जन्मनि अन्यत्र वर्षलग्नादौ च चिंतयेत् ॰ इत्थममुनाप्र
कारेण नवसंख्याका भावाः शस्ताः शुभफलदाः स्युः ॥ ग्रहाधितद्वादशाष्टमषड्भावाः अशुभाः स्युः इमे द्वादशाष्ट
मषड्भावाः अधिष्ठितग्रहदीप्तांशानतिक्रम्य वर्तेरंस्तदा ते विभावाः शस्ताः शुभफलदातारः स्युरिति विचिंत
येत् ॰ तत्राप्यधिष्ठितग्रहदीप्तांशमध्ये इमे रिःफाष्टमभावा यदि स्युः तदैवानिष्टा इत्यर्थः ॰ अथ त्रैराशिकस्वामि
न आह ॰ त्रिराशिपा इति ॰ दिनोदयावर्षप्रवेशे मेषाद्चतुर्णां राशीनां सूर्यसितार्किशुक्राः स्वामिनः स्युः यथा दिवा
वर्षप्रवेशे मेषलग्नं तदा सूर्यः वृषस्य शुक्रः मिथुनस्यार्किः कर्कस्य शुक्रः निशि रात्रौ वर्षप्रवेशे मेषादीनां चतु

नी॰ ३॰ ण्राशीनांईज्येंदुबुधस्नमाजाः स्वामिनः यथारात्रौमेषलग्नस्वामीगुरुः वृषस्यचंद्रः मिथुनस्यबुधः कर्कस्यभौमः ए
तेरविभात्स्वचतुर्णांराशीनांविलोमंविपरीतंज्ञेयाः मेषादीनांयेदिवेशास्तेसिंहादीनांरात्रावीशाः मेषादीनांरा
त्रीशास्तेसिंहादीनांदिनेशाइत्यर्थः तद्यथादिनेसिंहलग्नस्यगुरुः कन्यायाश्चंद्रः तुलायांबुधः वृश्चिकस्यभौमः
तथारात्रौसिंहस्यसूर्यः कन्यायाःशुक्रः तुलायाःशनिः वृश्चिकस्यशुक्रः परेषुधनुरादिषुराशिषुचतुर्षुनित्यंसदा
दिवारात्रौवर्षप्रवेशेआर्किकुजेज्यचंद्राःस्वामिनः यथाधनुषःशनिः मकरस्यभौमः कुंभस्यगुरुः मीनस्यचंद्रः अ
॥१६॥ नयोर्दिवारात्रौवर्षप्रवेशेसतिविपर्ययोनास्तीत्यर्थः अथैतस्यप्रयोजनमाह वर्षेशार्थेदिननिशाविभागोक्तास्त्रि
मे वृ मि क सिं कं तु वृ ध म कुं मी राशिपाः पंचवर्गीबलाद्यर्थंद्रेष्काणेशान्विचिंतयेत् ५९ एतेवर्षेशार्थंवर्ष
दिवा र शु श बु गु चं बु मं श मं गु चं शनिर्णयार्थंदिननिशाविभागेनत्रिराशिपाउक्ताः पंचवर्गीबलाद्यर्थंपूर्वोक्ता
निशा गु चं बु मं र शु श गु श मं गु चं न्द्रेष्काणेशान्विचिंतयेत् अथक्रमप्राप्तंउदाहरणप्रदर्शनार्थंवर्षतंत्रोक्तंच
तुर्भिःश्लोकैर्वर्षेशनिर्णयनिर्णयमाह तत्रादौअधिकारिणमाह जन्मलग्नेति जन्मलग्नपतिःजन्मलग्नस्वामी
अब्दलग्नपोवर्षलग्नस्वामीमुंथहाधिपतिःमुंथास्वामीत्रिराशिपः त्रिराशिकस्वामीसूर्यसितार्किशुक्राःइत्या ॥१६॥
दिनात्रैराशिकेश्वरोज्ञेयः अह्निदिवावर्षप्रवेशेसतिसूर्याधिष्ठितराशिस्वामी निशायांचंद्रमाधीश्वरश्चंद्राधिष्ठि
तराशीशोज्ञेयः एवंरात्रिस्वामीज्ञेयः अनयारीत्याग्रहपंचकंविमृश्यविचार्य एवंपंचाधिकारिणोज्ञात्वातेषांद
ग्बलंपंचवर्गीबलंचज्ञात्वावर्षादिनिर्णयमाह बलीयइति एषांपंचानांअधिकारिणांमध्येयोग्रहोबलीपंच
वर्गीबलाधिकः तनुर्लग्नंईक्षमाणःपश्यति सवर्षपोवर्षस्वामीज्ञेयः बलिष्ठोपिग्रहोलग्नमनीक्षमाणो

लग्नंनपश्यतितदावर्षाधिपोनैवबलीस्यात् यदाबलस्यसाम्यंपंचवर्गीसर्वेतुल्यबलास्तदादृष्ट्यातिरेकात्
तस्ययथाथः अधिकदृष्ट्यालग्नंपश्यतिसएववर्षाधीशइत्येवमाद्याविदुः वदंतिदृष्टेसाम्येचाह दृष्ट्यादिसा
म्येपीति सर्वेषांदृगादिसाम्येपिआदिशब्दाद्बलसाम्येथवानिर्बलत्वेवर्षाधिपः वर्षस्वामीमुंथहेश्वरः स्यात्
एतेपंचाधिकारिणःसबलाअपितनुर्लग्नंनईक्षमाणाःनपश्यंतितथापिधनःअंकतोस्यैवबलाधिक्यंसएवा
ब्दस्यवर्षस्यविभुःस्वामीविचिंत्यः अथकेचिन्मतेनदृष्टिबलसाम्येवर्षाधिपतिनिर्णयमाह बलादिसाम्येर
विराशिपाह्निनिशीदुराशीशइतिकेचिदाहुः येनेत्थशालोयदिविभुःशशीसवर्षाधिपश्चंद्रभयोन्यथात्वे बलादि
साम्येआदिशब्दाद्दृष्टिसाम्येअह्निदिवावर्षप्रवेशेरविराशिपाख्योक्रांतराशीश्वरोवर्षेश्वरोज्ञेयः निशिरा
त्रौवर्षप्रवेशेइंदुराशीट्चंद्राक्रांतराशीश्वरोज्ञेयइतिकेचिदाहुः उत्तरार्धविशेषमाह येनेत्थशालइति यदि
उक्तप्रकारेणशशीचंद्रःअब्दपोविभुःवर्षस्वामीजातःसयदिपंचाधिकारिमध्येस्थितेनग्रहेणसहेत्थशालंकु
रुतेतदासएववर्षाधिपःवर्षस्वामीकल्प्यः अन्यथात्वेमुथशिलयोगाभावेचंद्रभयश्चंद्राक्रांतराशीश्वरोव
र्षाधिपोज्ञेयः अथमुंथनयनमाह स्वजन्मलग्नात्प्रतिवर्षमेकैकराशिभोगान्मुंथहाभ्रमेण स्वजन्मलग्नंरवि
तष्टयातागतैर्युतंसाम्मुखेस्थिताःस्यात् ॥ यदाजन्मजातंतस्मिन्समयेयल्लग्नंतदासैवमुंथहा सामुंथहास्वज
न्मलग्नात्प्रतिवर्षंएकैकराशिआरभ्यभ्रमतिजन्मलग्नंकन्याकन्यासमयेतत्रैवमुंथहा द्वितीयवर्षेतुलाया
मित्यादिमुंथहास्त्रिप्रकारःइष्टवर्षेभवति अथमुंथानयनं राश्यादिस्वजन्मलग्नंयातशरयुतंजन्मका

नी॰ ५ लग्नं तद्वर्षगणेन युतं द्वादशभिस्तष्टं शेषप्रमिता मुखाद्राश्यादिरिष्टवर्षेऽथिहा स्यात्॥ उदाहरणं जन्मलग्नं
५।१५।५३।५०। गतवर्षेण ३७ युतं ४२।१५।५३।५० द्वादश भिस्तष्टं शेषप्रमिता जाता राश्यादिर्मुथहा ६।
१०।५३।५० अथ राहोर्मुखपृष्ठपुच्छानां लक्षणमाह॥ भभोग्या राहोर्लवास्तस्य मुखं पुच्छं गताल्लवाः॥ ततः सप्तम
भं पुच्छं विमृश्येति फलं वदेत्॥ यस्मिन् राशौ राहुरस्ति तेन भमिति न्यायेन ये भोग्या अंशास्ते मुखसंज्ञकाः ततः सप्त
॥२७॥ मभं राहोः सप्तमभं सप्तमराहुपुच्छसंज्ञकाः इति विमृश्य विचार्य मुथहायाः फलं वदेत्॥ अथोक्तप्रकारेण वर्षेशनिर्ण

श्रीगर्गान्वयभूषणं गणितविच्चिन्तामणिस्तत्सुतोऽनन्तोऽनन्तमतिर्व्यधात्खलमतिध्वस्त्यै जनुःपद्ध
तिं॥ तत्सूनुः खलु नीलकण्ठविबुधो विद्वच्छिवानुज्ञया संतुष्ट्यै व्यदधाद्ग्रहप्रकरणं संज्ञाविवेके खिलं॥
॥६॥ इति ग्रहप्रकरणम्॥ चस्थूर्योऽल्पोना चतुरस्रमध्यदिनेन्द्रदिक्स्वर्णचतुष्पदोग्रः॥ सत्व
स्थिरत्तिक्तपशुक्षितिसुपित्तं जरत्पाटलमूलवन्यः॥ १॥

र्यः तत्राद्ये जन्मलग्नेशो भौमः मुथहेशो भृगुः त्रैराशिकेशः सूर्यः दिनेशः शनिः पंचानांमध्ये बलिष्ठः पूर्णदृष्ट्या ल ॥२७
ग्नं पश्यति अतो वर्षेशः शनिः॥ श्रीगर्गान्वयेति स्पष्टं॥ इति श्री दिवाकरदैवज्ञात्मज विश्वनाथदैवज्ञेन विरचिते नील
कण्ठज्योतिर्वित्कृतसंज्ञातंत्रे ग्रहाध्यायस्य व्याख्योदाहृतिः समाप्ता॥ अथ ग्रहाणां स्वरूपं॥ तत्रादौ सूर्यस्य स्वरूपमा
ह॥ सूर्योऽल्पोन॥ सूर्यस्तु ईदृशो ज्ञेयः नृपः क्षत्रियः नापुरुषोऽग्रहः चतुरस्रः चतुष्कोणाकृतिः मध्यदिनं मध्याह्न
काले प्रबलः इंद्रदिक् पूर्वदिक्स्वामी स्वर्णं सुवर्णद्रव्यस्वामी॥ चतुष्पदः गजादीनां प्रभुः उग्रः क्रूरः सत्वप्रधानः

स्थिरः स्थिरस्वभावः तिक्तः तिक्तरसप्रियः पशुक्षितो गो भूमिचारी पित्तः पित्तप्रकृतिः जरत् वृद्धः पाटलः श्वेत
रक्तवर्णः मूलो मूलोत्पन्नस्य धान्यादेरधिष्ठाता॥ वन्यो वनचारी एवंगुणविशिष्टः सूर्यः॥ अथ चंद्रस्वरूपमाह॥ वैश्यः
शशीति॥ शशी चंद्रः वैश्यजातिः स्त्री स्त्रीग्रहः जलभूः आर्द्रभूमिचारी तपस्वी गौरः गौरवर्णः अपराह्णे अपराह्ण
काले प्रबलः अंबुगो जलचारी धातुः गैरिकादिः सत्वः सत्वप्रधानः वायव्यदिक् वायव्यादिक्स्वामी श्लेष्मप्र
धानः भुजंगस्वामी॥ युवा तरुणः स्थूलः स्थूलकायः रौप्यः रजतमयः शुभः शुभग्रहः सिताभः शुभ्रवर्णः एतादृ

वैश्यः शशी स्त्री जलभूस्तपस्वी गौरोऽपराह्णांबुगधातुसत्वं॥ वायव्यदिक् श्लेष्मभुजंगरूप्यः स्थू
लो युवा क्षार शुभः सिताभः॥ २॥ भौमस्तमः पित्तयुवोग्रवन्यो मध्याह्नधातुर्यमदिक्चतुष्पात्॥
नाराट्चतुःकोणसुवर्णकारक् धावनी व्यंग कटुः कटुस्वरक्तः॥ ३॥

शश्चंद्रः॥ अथ भौमस्वरूपमाह॥ भौमस्तम इति॥ तम स्तमोगुणप्रधानः पित्तं पित्तप्रकृतिः युवा तरुणः उग्रः क्रूरः व
न्यो वनचारी॥ मध्याह्ने मध्याह्नकाल प्रबलः धातुः गैरिकादिः यमदिक् दक्षिणादिक्स्वामी चतुष्पदानां अश्वानां प्र
भुः नापुरुषः राट् राजा क्षात्रः क्षत्रियः चतुष्कोणः चतुष्कोणाकृतिः सुवर्णकारः स्वर्णकाराणां स्वामी धावनी उत्क
लभूमिचारी॥ व्यंगः किंचिद्व्यंगः केचिदंगरहितः कटुः कटुरसप्रियः रक्तः ताम्रवर्णश्च रक्तवर्णस्वामी॥ अथ बु
धस्वरूपमाह॥ ग्राम्यः शुभ इति॥ ४ ग्राम्यः ग्राम्यस्वामी॥ शुभः सौम्यः नीलवर्णः सुवर्णः सुवर्णस्वामी एवं बु
तुल्याकृतिः शिशुर्बालः इष्टकोष्ठः इष्टकोष्ठसंचारी॥ शुभः सौम्यः समधातुः वातपित्तकफात्मकः जीवो मनु

नी॰ ५ व्यादिः श्मशानं यत्र शवदहनं भवति तत्स्थलविहारी॰ योषाकृती उत्तरदिक्स्वामी प्रभातं प्रभातकाले प्रबलः शूद्र
जातिः खगः पक्षिजातिः सर्वरसः कटुकादिरसप्रधानः रजः रजोगुणप्रधानः इः बुधः एवं गुणविशिष्टो ज्ञेयः॰ अथ
गुरुस्वरूपमाह॰ गुरुः प्रभात इति॰ एतादृशो गुरुः प्रभाते प्रातःकाले प्रबलः नापुरुषः शुभः सौम्यग्रहः ईशादि
क् ईशानदिक्स्वामी॰ द्विजो ब्राह्मणः पीतः पीतवर्णः द्विपात् द्विपदं मनुष्याणां स्वामी ग्राम्यः ग्रामचारी सुरूपो वे
॥१८॥ र्तुलाकृतिः जीवो मनुष्यादिः वाणिज्यः वाणिज्यकर्मकर्ता माधुर्यः मधुररसप्रियः सुरालये शो देवतागृहस्वामी॰
हृस्वः हृस्वग्रहः सुरत्नं शोभनदिक्स्वामी॰ समधातुः वातपित्तकफात्मकः सत्त्वं सत्त्वगुणप्रधानः अथ भृगोः स्वरू
ग्राम्यः शुभो नीलसुवर्णरत्नः शिखिविट्कोणः समधातुजीवः॥ श्मशानयोषोत्तरदिक्प्रभातं शूद्रः ख
गः सर्वरसो रजोज्ञः॥४॥ गुरुः प्रभाते नृशुभेशादिक्द्विजः पीतो द्विपात् ग्राम्यसुवृत्तजीवः॥ वाणिज्य
माधुर्यसुरालयेशो हृस्वः सुरत्नं समधातु सत्त्वं॥५॥ शुक्रः शुभस्त्री जलगोऽपराह्णः श्वेतकफी रू
प्यरजोऽम्लमूलं॥ विप्रोऽग्निदिङ्मध्यवयास्तरुणो जलावनीस्निग्धरुचिर्द्विपाच्च॥६॥ ॥१९॥
पमाह॰ शुक्र इति॰ एतादृशः शुक्रो ज्ञेयः शुभः शुभग्रहः स्त्री स्त्रीग्रहः जलगो जलचारी अपराह्णो अपराह्णका
ले प्रबलः श्वेतः शुभ्रवर्णः कफी कफप्रकृतिः रूप्य रूप्यद्रव्यस्वामी रजः रजोगुणप्रधानः अम्लः अम्लरसप्रि
यः मूलो मूलोत्पन्नधान्यादिस्वामी॰ विप्रो ब्राह्मणः अग्निः आग्नेयदिक्स्वामी॰ मध्यवयाः तरुणः स्तोमः
क्रीडारसप्रधानः जलावनी जलभूमिचारी स्निग्धरुचिः श्लक्ष्णकांतिः द्विपात् द्विपदं मनुष्याणां स्वामी॰ अथ
शनिस्वरूपमाह॰ शनिर्विहंगो इति॰ शनिरेतादृशः विहंगमपक्षिजातिः अनिलो वायुः वन्यो वनचारी॰ संध्या

संध्याकाले प्रबलः शूद्रजातिः अंगना स्त्रीग्रहः धातुसमः वातपित्तकफात्मकः स्थिरः स्थिरस्वभावः क्रूरः
पापग्रहः प्रतीची पश्चिमदिक्स्वामी॰ मध्यवयाः दीर्घाकृतिः सुनीलः कृष्णनीलवर्णः लोहं लोहस्वामी॰ ७
अथ राहोः स्वरूपमाह॰ राहोः रूपं शनिवज्ज्ञेयं॰ तत्र किंचिद्विशेषोऽस्ति इत्याह॰ राहुः स्वरूपमिति॰ निषादश्चांडा
लविशेषः भुजंगः सर्पस्वरूपः अस्थिपोऽस्थिमी॰ नैर्ऋतीशः नैर्ऋत्यादिक्स्वामी॰ अथ केतुस्वरूपं तद्वद्राहुव
त्॰ परं त्वेतावान्विशेषः केतुः शिखी शिखावान् शान् अनेकरूपः नानाविधरूपः इत्थममुना प्रकारेण ग्रह
शनिर्विहंगोऽनिलवन्यसंध्याशूद्रोंगनाधातुसमः स्थिरश्च॥ क्रूरः प्रतीचीतुवयोतिवृद्धोः कराक्षिती
दीर्घसुनीललोहं॥७॥ राहुः स्वरूपं शनिवन्निषादजातिर्भुजंगोऽस्थिपनैर्ऋतीशः॥ केतुः शिखी
तद्वदनेकरूपः खगः स्वरूपात्फलमित्थमूह्यं॥८॥ अथ दृष्टिः दृष्टिः स्यान्नवपंचमे बलवती प्रत्य
क्षतः स्नेहदा पादेनाखिलकार्यसाधनकरी मेलापकाख्योच्यते॥ गुप्तस्नेहकरी तृतीयभवने कार्य
स्य संसिद्धये त्र्यंशोनाकथितात्तथा यभवनेषड्रागदृष्टिर्भवेत्॥९॥
स्वरूपात्फलमूह्यं ज्ञेयं॰ अथ दृष्टिमाह॰ तत्र ग्रहाणां चतुर्धा दृष्टिः एका प्रत्यक्षस्नेहदा॰ द्वितीया गुप्तस्नेहदा॰ तृ
तीया गुप्तवैरा॰ चतुर्थी प्रत्यक्षवैरा॰ तत्रादौ स्नेहदृष्टिमाह॰ दृष्टिरिति॰ ९ कुत्र्यां ग्रहाक्रांतस्थानात् नवपंच
मे नवमस्थानं पंचमस्थानं नवपंचमस्थानस्थं वा ग्रहः पश्यति सा दृष्टिर्बलवती प्रत्यक्षतः स्नेहदा प्रीतिदा॰ पा
देनासा दृष्टिश्चतुर्थांशन्यूना पंचचत्वारिंशत्कलात्मिका भवेत् अखिलानां समस्तानां कार्याणां साधनं

नी॰ ३. संपत्तिं करोति॰ मेलापकापरस्परं प्रीतिकारिणी स्यैकादृष्टिः अथवा क्रांतस्थानात् ग्रहस्तृतीयस्थानमेक
दशस्थानं तत्स्थानस्थं वा पश्यति सा दृष्टिः गुप्तस्नेहकारिणी कार्यसिद्धिदा भवति सा दृष्टिः तृतीयभवने त्र्यंशो
ना चत्वारिंशत्कलात्मिका ४० कथिता भवेएकादशस्थानेषडुगः षडंशः दशकलात्मिका दृष्टिः स्यात्॰ अथग्रहस्य
शत्रुदृष्टिमाह॰ दृष्टिरिति॰ स्वाक्रांतस्थानात् ग्रहश्चतुर्थस्थानस्थं दशमस्थानस्थं ग्रहं पश्यति सा दृष्टिर्गुप्तारिभावा
अप्रकाशितशत्रुभावस्थिता पादमिता चतुर्थांशमिता पंचदशकलात्मिका १५ दृष्टिस्तथान्योन्यं परस्परं सप्तमे
॥२१॥ दृष्टिः पादमिता चतुर्थदशमे गुप्तारिभावास्थितान्योन्यं सप्तमभे तथैकभवने प्रत्यक्षवैराखिला॥
इत्थं दृक्त्रितयं कृताकृयमिदं कार्यस्य विध्वंसदं संग्रामादिकलिप्रदं दृशइमास्युर्दृशांशांतरे॥२०॥
सप्तमराशौ तथैकभवने एकराशावपिग्रहाः यत्पश्यंति सा दृष्टिः प्रत्यक्षवैरा अखिला संपूर्णा ६० दृष्टिः षष्टि
कलात्मिकास्यात् इदं इत्थं दृक्त्रितयं चतुर्थदशमरूपमेकं समसप्तमरूपं द्वितीयं एकराशिमितं तृतीयमेवं दृग्
दृष्टित्रितयं कृताकृयं सफलशुभकर्मनाशकं इदमपि दृष्टित्रयं कार्यस्याभीष्टस्य विध्वंसदं किंच संग्रामादिसंग्रामो
युद्धं तत्प्रभृति कलिप्रदं युद्धकारकं क्लेशप्रदं दातिइमा दशोद्वादशांतरे दृष्ट्यदिशांतरं द्वादशभागानधिकं तदा ॥२१॥
पभोक्तफलदाश्चः स्युः॰ अथ गणितागत दृष्टिसाधनमाह॰ २१ अपास्यपश्यन्निति॰ तिथ्यरति॰ २२ यो ग्रहः
पश्यति स द्रष्टा यं पश्यति स दृश्यः पश्यंतं द्रष्टारं ग्रहं निजदृश्यखेटाद् पास्य संशोध्य यद्राश्यादिशेषं
तिष्ठति तस्मिन्नेकादशे षात्मके ध्रुवाः स्थिराः लिप्तिकाः दृष्टिकलाः पूर्णमित्यादिकाः स्कः तथयथा॰ द्रष्टा रहि

तदृश्यग्रहस्य राशिस्थाने एकस्मिन् शेषे पूर्णं शून्यं दृष्टिः ० द्विशेषे खवेदाः ४० चत्वारिंशत् त्रिशेषे तिथयः १५ चतुः शे
षे अक्षवेदाः पंचचत्वारिंशत् ४५ पंचशेषे खं शून्यं षट्शेषे षष्टिः ६० सप्तशेषे अभ्रं शून्यं ० अष्टशेषे खवेदसंख्या प
च चत्वारिंशत् ४५ नवशेषे तिथयः १५ दशशेषे खचंद्राः १० एकादशशेषे वियत् शून्यं॰ द्वादशशेषे शून्य शेषे वा अभ्रत
र्काः ६० षष्टिः शेषांशेति द्रष्टारहित दृश्यराशिस्थाने योंकः प्राप्तः सस्थाप्यः याते ष्ययोर्गतगम्ययोर्विश्लेषांतरं कार्य
तद्यथा॰ राशिस्थाने योंकः प्राप्तः सयातसंज्ञकः तस्याग्रिमांकोयः सएष्यसंज्ञकः तयो रंतरं कार्यं तेनांतरेण शेषांशागु
ण्याः ततः खरामैः ३० त्रिंशद्भिर्भक्तैर्यल्लब्धं कलादिकं ध्रुवेराशिस्थाने प्राप्तांके स्वर्णं कार्यं कृत अधिकोनकेष्विति॰ य
अपास्य पश्यं निजदृश्यखेटादेकादशेषे ध्रुवलिप्तिकाः स्युः॥ पूर्णं खवेदास्तिथयोक्षवेदाः
खं षष्टिरभ्रं शरवेदसंख्याः॥२१॥ तिथ्यः खचंद्राश्वियदभ्रतर्काः शेषांशयातैष्यविशेषघाता
त्॥ लब्धं खरामैरधिकोनकेष्वे स्वर्णं ध्रुवे तास्फुटदृष्टिलिप्ताः॥२२॥
यदा अग्रिमो ध्रुवः तदधिको भवेत्तदाय पदे नोऽग्रिमो ध्रुवः तदा ऋणं एवं सति स्फुटास्पष्टा दृष्टिलिप्ताकलाः स्युः
उदाहरणं द्रष्टा चंद्रः ५।२२।१४।७ दृश्यो रविः १।७।२०।६ द्रष्टृरहितः ८ दृश्यः ३।१५।२०।१९। अस्य राशिस्थाने त्र
योंकाः त्रयाणामधः पंचदश ध्रुवकरः प्राप्तः १५ अग्रिमोंकः पंचचत्वारिंशत् ४५ अनयोरंतरेण ३० शेषांशाः १५।२०
२० गुणिताजाताः ४६०।१०। ३० त्रिंशद्भक्ता लब्धं १५।२० इदमग्रिमांकस्याधिकत्वात् पंचदशमध्ये युतं जाता स्फुटो
दयोपरि चंद्रकलात्मिका दृष्टिः ३०।२० एवं सर्वग्रहाणामपि ज्ञेयं अथ ग्रहाणां चक्रमग्रे लेख्यं यंत्रवशात्॥

नी·३· अथग्रहमैत्रीचक्रमाह· पश्यन्निति·१२ यंग्रहंमित्रदृष्ट्यानवपंचतृतीयैकादशदृष्ट्यापश्यतिसग्रहस्तंप्रतिमित्रंज्ञे
यः योग्रहःरिपुदृशाशत्रुदृशाचतुर्थदशमैकसःसदृष्ट्यापश्यतिसतंप्रतिशत्रुर्ज्ञेयः अन्यथामित्रशत्रुदृष्ट्यभावेपरिशे
षाद्वितीयषष्ठाष्टमद्वादशस्थानेषुसमताभवतिअत्रार्थेसंमतिवाक्यं तृतीयैकपंचमनवमैकादशोगतोपियोयस्य
धनेषुमतिरिःफेषुचसमोग्रहःस्यादितिज्ञेयं १२शत्रुरर्थैकतुर्यजायास्थानस्तथादशमे· ताजिकहिल्लाजमतेनैकाला
द्दृक्कथितमस्माभिः॥२॥ अथमित्रशत्रुसमविचारेनवमपंचमादिस्थानीष्टरेवग्राह्या अत्रसर्वेषांस्थानेषुपृथ
॥२०॥ ग्विगणितागतदृष्टिरायातितथापिसानग्राह्या कुतः दृष्ट्यभावेनसमतोक्तागणि
णितागतदृष्टेःसमताद्यभावःस्यादितिहेतुरितिकेचित्कथयन्तिस्तु अत्रलग्नयो
रेकपंचसप्तमैकादशांतरयोस्तुल्यभागाग्रहयवयोर्गणितागतदृष्टिरभावः यथा
दृष्टांचंद्र ५।७।२०।५० दृश्योबु· २।७।२०।५० बाबुधः ६।७।२०।५० बाबुधः ०।७।३०
५०। बाबुधः ३।२०।३०।५०। एवंकदाचित्संभवतीतिग्रंथांतरेनोक्ताः॥ अथसूर्या ॥२०॥
दीनांदीप्तांशानाह· तिथ्यर्केति· सूर्यस्यतिथयः पंचदश १५ चंद्रस्यार्काः १२ भौम
स्याष्टौ ८ बुधस्यनगाः सप्त ७ गुरोरंकाः ९ नवभृगोःस्यशैलाः सप्त ७ शनेः खचराः
नव ९ सी सूर्यादिनांग्रहाणांएतेदीप्तांशाःकाज्ञेयाः अथदृष्टेकश्चिद्विशेषोच्यते
चक्रइति· चक्रेलग्नद्वादशराशिचक्रेवामदृक् बलवतीज्ञेयादक्षिणदृष्ट्यपेक्षया

र	चं	मं	बु	गु	शु	श	ग्र
०	३० २०	१४ ५	८ ३५	१४ १०	४ १८	१५ ४१	सू
२० २०	० १०	२१ २५	२२ १५	२२ २५	३८ ८	३० ४१	चं
१४ ५	१२ ४	० ०	५५ २७	२८ १४	१८ ५८	१८ २७	मं
१८ ३३	१२ २१	१५ २०	० ०	२५ २१	२४ ३१	८ ५४	बु
४८ १०	२२ २५	१८ १९	२५ ११	० ०	१० ४७	१३ ४३	गु
७ २७	१० २४	११ १०	१४ ३१	६ २४	० ०	५ ५४	शु
१५ ४३	३० ४१	३३ ३३	३५ २७	२१ ०	२६ ५६	० ०	श

यमर्थः· वामस्थवामस्थानस्यग्रहस्यदृक्वामदृक्वामभागस्थस्यग्रहस्यदक्षिणवामभागस्थग्रहोपरियादृष्टिःसा
बलवती· लग्नाद्विषष्ठांतंदक्षिणविभागः सप्तमद्वादशांतंवामविभागः [illegible] लग्नकुंभेवृषआलकेकटकरित्यादि
श्लोकेवामयुदितेरितिराशिभिरुदितेदृश्यभागावस्थितेर्वामांगोविभागः लग्नस्योदृक्भागाः तथाद्वादशैकाद
शनवमाष्टमा· सप्तमस्यराशेर्लग्नानुदिततुल्यभागएष्युदितोभागः अयमेववामविभागः शेषेअनुदितःअ
र्थादनुदितेरदृश्येदक्षिणोविभागः तवलग्नानुदितभागस्तथाद्वितीयतृतीयचतुर्थपंचमषष्ठसप्तमराशेर्लग्नो
दिततुल्यभागइत्यनुदितोविभागः एवंदक्षिणोविभागः इतिभट्टोत्पलः चक्रेवामदृगुच्यतेबलवतीत्यत्रार्के चिंदेवनु
अथमैत्री॥ पश्यन्मित्रदृशासुहृद्रिपुदृशाशत्रुःसमस्त्वन्यथातिथ्य १५ र्का १२ वसु ८ नगां ७ कं ९ शैल ७
खचराः ९ सूर्यादिदीप्तांशकाः॥ चक्रेवामदृगुच्यतेबलवतीमध्यायथावेश्मनीत्येकेर्द्धेपिदृगुच्य
र्धजननीत्येकेविदुःसूरयः॥१३॥
दाहरणमाह मध्यादिति· मध्याद्दशमस्थानाद्वेश्मनि चतुर्थस्थानेपापदृष्टिःसाबलवतीत्यर्थः· एतदुक्तंभवति द
शस्थानस्थितस्यग्रहस्यचतुर्थस्थानस्थितग्रहोपरियादृष्टिःसाबलवतीत्यर्थः दशमस्थानस्थितग्रहस्यचतुर्थस्था
नस्थितोग्रहोपरियादृष्टिःसानिर्बलेत्यर्थःतःसूचितं· सप्तमादिद्वादशस्थानस्थितानांग्रहाणांलग्नादिषष्ठांतस्थान
स्थितेषुग्रहेषुयादृष्टिःसाबलवतीत्यर्थः समरसिंहस्याप्ययमेवार्थः तद्यथा· चक्रस्यवामदृष्टिर्दक्षिणाइतिबलीयसी
ज्ञेया भकेद्वेपरिदृष्टिदृष्टिर्मध्यात्सबलेतिसर्वतोप्युद्धमिति· वामदृष्टिरित्यत्रसप्तमीतत्पुरुषः वामेदृष्टिः दक्षिणे
दृष्टिर्मध्यात्सबलेतिसर्वतोप्युद्धमिति